This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M 509 विषय પુરાણ.
नांव આષાઢ મહાત્મ્ય Mss.
लेखक/लिपीकार —.
पृष्ठ 14.
काळ ______ पूर्ण/अपूर्ण ______.

Che

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेतत्रकृत्वापुण्यंमहन्मघादददत्॥१६॥तस्यपुण्यप्रभावेननरकान्निर्गतः पुनः॥घोरंप्रेतत्वमापन्नोसम्न्योस्यश्चमहोदरः॥१७॥
जलाशयः सुबहुशः संतिचान्यपदेपदे॥शुचिः शीतोदकोनघासरांसिविविधानिच॥१८॥तृषार्त्तकोपिनलभेद्येकामप्युदकां
जलिं॥विप्रोछिष्टानिभूतेभ्यः सातिलान्नानिसर्वतः॥१९॥सिक्तमेकंनचाप्नोतिक्षुधार्तोसर्वतोभवान्॥कदाचिदपिकिंचिन्नलभेन्नंबा
जलंयदि॥२०॥सूचिमुखस्याहरतः पिपत्तोनासहोदरं॥ममपूर्येतवर्षाणात्रातेनापिकथंचन॥२१॥क्षुत्तृष्णाव्याप्तदेहोहंनसुखं
प्राप्नुयाक्षणं॥प्रेतत्वेवर्त्तमानस्यवर्षद्वादशकंगतं॥२२॥इतिवः सर्वकथितंमयाप्रेतत्वकारणं॥दिगंबरामलाक्लिष्टा आरुग्णा
श्चंचारिकाः॥२३॥मर्कामुंडाश्चलंबोष्ठाहातुराश्चभयानकाः॥इमामवस्थांसंप्राप्ताविपाकात्कस्यकर्मणः॥२४॥तन्मेनिगद्यतां
सर्वंममात्रास्तिकुतूहलं॥इतितेनद्विजेनोक्तामूकहस्तुमक्षमाः॥२५॥संज्ञयाज्ञापितसर्वंयत्कृतंपूर्वजन्मनि॥लंघनंवेदमार्ग
स्यपाखंडमनुवर्त्तनं॥२६॥नपिंडदानंनस्नानंनपितॄणांचतर्पणं॥नपूजासत्कारोद्विजातांचविधैः कृचित्॥२७॥तेनैतां
कुदशांप्राप्ताकस्यभोग्यांसुदारुणां॥समानदुःखैः स्वकर्मभिधएवममादिनः॥२८॥अन्वगछामतंसर्वेप्यन्यजन्मजला
र्थिनः॥सार्थोजगामतपतीवयंतुदूरतः स्थिताः॥२९॥तस्यसार्थस्यमध्यस्थोद्विजपुत्रः समाययौ॥तेनतत्रकृतंस्नानंआषा
ढेतपतीजले॥३०॥यथावन्मासमेकंतुतस्यांतेभोजिताद्विजाः॥तदनुज्ञाइतिप्राप्यस्नानंसंपूर्णनस्तुतं॥३१॥कृताषाढफलंपि
त्रैददौब्राह्मणसंनिधौ॥आषाढस्यफलेदत्तेप्रेतदेहंचतत्क्षणात्॥३२॥सत्यक्त्वादिव्यदेहोभूद्विमानवरमास्थितः॥उवाच
पुत्रंमुदितोवत्ससाधुत्वयाकृतं॥३३॥नरकादुध्धतः पूर्वंदारुणात्[illegible] दुष्टकर्मजात्॥इदानींतुप्रेतभावान्मोचितोदुःखसाग
रात्॥३४॥येतेधन्याः पुण्यवंतश्चतैश्चलोकद्वयंजितं॥भवंतियेषांसत्पुत्राः पुण्यकर्मपरायणाः॥३५॥अदातारोपिदातारः
रः पापिनोपिन्वपापिनः॥वरमेकः सुपुत्रोनकुपुत्राणांशतेनकिं॥३६॥प्रीणातिस्वपितॄन्यस्तु सततंपितृकर्मणा॥सफलंजी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आषाढ० वितंतस्यधन्यास्तेनैवपूर्वजाः॥३७॥तस्मात्प्रातिदिनंदेवाः पितरोमनुजास्तथा॥ऋषयश्चैवभूतानि समीहंतिचसत्कृतिं॥३८॥एता म०१

॥४॥ सत्कृसयोभुंक्ते तस्माच्छ्रेष्टतरोहिकः॥कृतार्थाः पितरस्तस्यतथामातामहा अपि॥३९॥कुलेतस्यतुनप्रेतास्तस्यपुत्रचपौत्र

काः॥धनानिदीर्घमायुश्चनकोशोअधमस्तथा॥४०॥नसंततेश्चविच्छेदोयःसदाचारवान्नरः॥आषाढपंचदिवसस्नाने

नप्रेतभावतः॥४१॥विमुक्तशेषपुण्येनविष्णुलोकोममाश्रयः॥इत्युक्त्वासनिजंपुत्रमस्माकंपश्यतांतदा॥४२॥विमा

नवरमारूढोवैष्णवंलोकतांव्रजेत्॥सार्थसार्थंनततस्तुचेंडुघ्रसपितरंनिजं॥४३॥मुद्रापरमयायुक्तोजगामचयथागतं॥

वयंतत्रस्थितास्तातनिराशाःस्वमोचने॥४४॥कोत्रमोचयितान्योस्तिप्रेतभावात्सुदारुणात्॥त्वंनःपुत्रोसितुपुरंपाखंडिवचनेस्थितः॥४५॥

नोनदास्यासितस्तुण्यंयेनमुच्यामहेवयं॥नरैःपाखंडिभिःप्रत्तैर्दीयतेयत्तुकिंचन॥४६॥कस्मादपिप्रसंगात्तत्पितॄणांनोपसर्पति॥सांप्रतं

तपतीजलेकुलेस्नानेनपावितं॥४७॥आषाढेयोग्यतांप्राप्तोह्यनिच्छन्नपिदैवतः॥सर्वथायदसंभाव्ययत्परंचमनोरथात्॥४८॥अकस्माच्चत

दानीयविधिर्घटपतिध्रुवं॥कत्वंजैनसमाचारःक्वतापीचमहानदी॥४९॥आषाढक्वचतेस्नानेमेनिछोरपिदैवतः॥तस्माद्भाविनुभंचात्रन

नमन्यामहेप्यतः॥५०॥एतेषांसमवायोयदुःकरसमजायत॥इतितेषांवचःश्रुत्वासवणिग्विस्मयान्वितः॥५१॥जैनधर्मपरित्यज्यचक्रे

स्नानंविधानतः॥एकादशींसमारभ्ययावत्संचदशीसिता॥५२॥कृत्वाश्राद्धंतुविधिवत्पूर्णिमास्यांसमाहितः॥तापीतटेददौपुण्यंपूर्वजेभ्यो

यथाविधि॥५३॥आषाढेपंचदिनजेस्नानेनयदुपार्जितं॥५४॥आषाढपंचदिनजंस्तपनस्यपुण्यंतेप्राप्यतत्रविजकुर्विकृतंशरीरं॥आरु

ह्यशुभरतांरुचिरंविमानंतेविष्णुलोकमगमन्नहियत्रप्राप्तः॥५५॥उधसनाषवणिकस्वपितृंस्तस्मात्संतकष्टजनकात्परेनभावात्॥आ

षाढमाससवनप्रभावंदृष्टानुवर्षसवनायसमुत्सुकोभूत्॥५६॥तेनाषाढदशस्नानंत्रिगुणात्वेकचेतसा॥तत्पुण्यात्तस्यदोषारोयज्जगत्यां ॥राम॥

नशोचति॥५७॥ईश्वरउवाच॥माहात्म्यमेतदुदितंरविनंदनायआषाढमाससवनस्ययथात्रवत्तो॥स्नानस्ययत्सविकलंफलमिछतीहश्रोतव्य ॥४॥

मेवखलुतेनमहायहारी॥५८॥इतितेकथितंसर्वंयस्त्वंपृष्टस्त्वयासुता॥ताप्याषाढफलंसम्यक्किमन्यच्छ्रोतुमिच्छसि॥५९॥इतिश्रीस्कंदपुराणे

रुद्रकार्तिकसंवादेताप्यांआषाढस्नानमहात्म्येप्रथमोध्यायः॥१॥ ॥स्कंदउवाच॥आषाढस्नानजंतातत्वयाप्रोक्तंमहाफलं॥आषाढ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपतीस्नानं सर्वपापहरं न्रणां॥३॥ कोविधिस्तस्य किंपुण्यं केतत्रनियमास्मृताः॥ तेषां केके फलंतन्मे ब्रूहि सर्वमशेषतः॥२॥ ईश्वरउवाच॥
प्रातःकरोतियः स्नानं मध्यान्हेपियथाविधिः॥ द्विगुणं फलमाप्नोति त्रिस्नात्त्रिगुणंफलं॥३॥ पयोष्णीसंगमेस्नानं देवानामपिदुर्लभं॥ यस्माच्चतुर्गुणंपुण्य
माषाढस्यप्रकीर्तितं॥४॥ तथैवाबुद्रुमस्याश्च संगमेपिनिगद्यते॥ मूलतापीकृतेस्नानैर्मुनयो नात्रविद्यते॥५॥ गोमत्यासंगमेचैतत्सर्वपापहरं स्मृतं॥ संग
मेयत्र कुत्रापि द्विगुणंपुण्यमुच्यते॥६॥ तथैवाद्विगुणंप्रोक्तं स्नानंशंकरसंनिधौ॥ सन्निधायास्यलिंगस्य चतुर्गुणमुदाहृतं॥७॥ शालिग्रामशिलोपे
तुतथैवस्याच्चतुर्गुणं॥ स्नानंकुर्वीतमौनेन त्यक्त्वाचैव॥ काम्यमानसः॥८॥ आदित्यमनसाध्यात्वा मार्जयेत्संचवारुणैः॥ ऋग्भिः स्वदेवताभिश्च मार्जयित्वात
तःपरं॥९॥ सूर्यपुत्रिनमस्तुभ्यंनम आषाढसंभवे॥ त्वत्प्रसादेनसंपूर्णमाषाढे स्नानमस्तुमे॥१०॥ इतिप्रार्थ्यनमस्कृत्य ततः स्नायाद्यवाग्यतः॥ स्नानां
तेतर्पणंकुर्यात्पितृनुद्दिश्यचस्ततः॥११॥ ततोरवेरूपस्थानं कुर्यात्तद्गतमानसः॥ विभ्राड्बृहच्छिवसंकल्पंसूक्तं पुरुषसूक्तकं॥१२॥ मंडलंब्राह्मणंतत्र
निर्गत्यचततोबहिः॥ एवंस्नानविधिंकृत्वा देवतानांचपूजनं॥१३॥ होमदानंयथाशक्तिततः कुर्याद्विचक्षणः॥ एवंप्रतिदिनंकर्म मासंयावत्समाहितः॥१४॥
सर्व यद्यत्करोतिभक्त्यात्र अक्षयंतद्भवेत्॥ सर्वपापहरंस्नानंयत्रतत्रप्रकीर्तितं॥१५॥ आषाढेकुरुतेयस्तु सूर्यपुत्र्याः प्रदक्षिणां॥ योजनेयोजनेस्नानं
कुर्वन्नेकाग्रमानसः॥१६॥ प्रवाहमूलमारभ्य यावच्चसरितांपतिः॥ विमुक्तकर्मबंधेभ्यः कैवल्यंसोधिगच्छति॥१७॥ ब्रह्मचर्येणकुरुतेयोधाव
त्प्रदक्षिणां॥ सब्रह्मलोकमाप्नोतिदुर्लभंमनुजैरपि॥१८॥ योजनेयोजनेस्नानं शुचेगोदानपुण्यदं॥ समग्रफलदंप्रोक्तं अशक्तस्यो ह्यवारि
णा॥१९॥ स्नानार्धफलदंकंठं स्नानंसद्भिर्निगद्यते॥ — — पादफलदंपादार्घस्याभिषेचनं॥२०॥ ऋग्विरब्देवनाभिश्च मुनिभिः परिकीर्ति
तं॥ स्नानान्येतान्यशक्तस्य कीर्तितेतनुकंस्तथा॥२१॥ अन्यदेशस्थितोयस्तु पुमान्नच्छिसविग्रहः॥ कुर्वन्नन्यजले स्नानं सपादफलमश्नुते॥२२॥
एकभक्तेनयः स्नायात्सस्वर्गाच्च्यवतेनतु॥ अयाचितेनतत्पुण्यं सपादेजायतेपुनः॥२३॥ नक्तभोजीनरस्नात्वा ब्रह्मलोकेमहीयते॥ उपवासस्नानक
र्तापुनर्नैवप्रजायते॥२४॥ फलभोजीनरस्नात्वासौत्राम्णोलोकमाप्नुयात्॥ पयोव्रतेनयोस्नातिस्वर्गलोकेवसेच्चिरं॥२५॥ स्नानंकुर्वन्पत्रभोजीश
कस्यादिसलोकतां॥ धात्रीफलैस्तिलैर्वापिस्नात्वास्वर्गेमहीयते॥२६॥ उष्णोदकंपरित्यज्य स्नानंकुर्यात्समाहितः॥ वारुणंलोकमासाद्यतत्रभोगान्सम
श्नुते॥२७॥ तैलाभ्यंगंवर्जयित्वारूपवाञ्जायतेदिवि॥ चंदनंतुपरित्यज्य चंद्रस्यैतिसलोकतां॥२८॥ पुष्पवर्जीनरोयस्तु नंदनेभोगभाग्भवेत्॥ ततोमहीतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आषाढम० पुनरागच्छेद्देवस्यमध्यतः॥२९॥कुर्वन्नाषाढ सवनंनरवल्लोगधरोभवेत्॥स्वर्गेक्रीडत्यप्सरोभिर्यावदाभूतसंप्लवं॥३०॥एकान्नभोजीतुनरो अ०२
॥५॥ मुनिलोकंसमश्नुते॥गोधूमान्वर्जयित्वातुभोगमादिविजायते॥३१॥योफलंवर्जयित्वातुदैवैवमानिकोभवेत्॥मधुवर्जीरवेर्लोकंमधुवर्जी
व्रगच्छति॥३२॥परान्नंवर्जयद्यस्तुसयातिपरमांगतिं॥भूमिशायीनरोयस्तुशक्रलोकंसगच्छति॥३३॥ब्रह्मचर्येणयोमर्त्योआषाढेस्नानमा
चरेत्॥अप्सरोलोकमासाद्यभुंक्तेभोगान्मनोरमान्॥३४॥वांछितान्लभतेकामान्नरस्तैलवर्जनात्॥गंधर्वलोकमाप्नोतिनिरोगं
धान्यविवर्जयेत्॥३५॥शाकाहारेणयोमासआषाढसवनंचरेत्॥आतिथ्यंदेवतानांसलभतेमानपूर्वकं॥३६॥त्रिकालंविष्णुमभ्यर्च्यम
हेशंवापिभक्तितः॥सूर्यंत्रिकंकारयतितत्तल्लोकंसमश्नुते॥३७॥स्नात्वापूतंजपेद्देव्यामासेप्रातिदिनंद्विजः॥ब्रह्महत्यादिकैःपापैर्मुच्य
तेनात्रसंशयः॥३८॥तिलहोमसहस्रंवाप्राणायामस्तुषोडश॥कुर्वन्पूर्वविधानेनसर्वमायातिगोभवेत्॥३९॥विष्णुलोकमवाप्नोतिकल्प
यावच्चतिष्ठति॥ततोवसुमतींप्राप्यसार्वभौमोभवेन्नरः॥४०॥विष्णोर्नामसहस्रंतुयोजपावच्चतिष्ठति॥ततोवसुमतींप्राप्यजपंस्तल्लोकमश्नुते॥४१॥
अष्टोत्तरशतंनाम्नातपसावाजपेन्नरः॥भक्त्यापरमयायुक्तएकाग्रचित्तोदृढव्रतः॥४२॥सूर्यलोकोसलभतेवासंयत्ररवेःसुत॥प्राणान्विदधताला
ताप्यायथाशक्त्यादिनेदिने॥भक्त्यास्नानंविधायादौलभतेपूर्ववत्फलं॥४४॥स्नात्वायःकुरुतेदीपंमासमेकंनिरंतरं॥आयतनेतुदेवानांतत्तल्लोकमुपैति
च॥४५॥ज्येष्ठपूर्णिमादिकृत्वाषाढस्यपूर्णिमा॥तावत्स्नानंप्रकुर्वीतस्यप्राग्पंचदिनोत्तरं॥४६॥यद्याषाढद्वयंवर्षेकदाचिदुपपद्यते॥तदाद्वितीयेयो
स्नात्वाद्विगुणंफलमाप्नुयात्॥४७॥आषाढस्नायिनांवत्सश्रृणुदानफलंमहत्॥येनदत्तेनपुरुषोलभतेवांछितंफलं॥४८॥धेनुंददातिविप्रायप्रस
हंयःपयस्विनीं॥विमुक्तःपातकैःसर्वैःसविलोकेसपूज्यते॥४९॥यावत्तपतिसूर्यःखेतावत्कालंसतिष्ठति॥पश्चात्सविष्णुसायुज्यंदुर्लभंप्रतिपद्यते॥५०॥
स्वशक्त्यायोघृतवापि[?]पक्षपक्षार्द्धवातदर्द्धकं॥एकावापिदलशक्त्यासोपितत्फलमान्भवेत्॥५१॥विनशाखंप्रकुर्वाणोदृढहापिजरद्वरं॥पुण्यंकिंचिन्न ॥राम॥
लभतेनरःप्रत्युतपापभाक्॥५२॥प्रत्यहंगजदानाच्चुशक्तोभवतिनिश्चितं॥रथदानात्तमत्त्वहयतद्दानाल्लदुन्नतं॥५३॥गोदानतोदशगुणंफलंतुनडुहःस्म ॥५॥
तं॥धुर्याणांबलयुक्तानांतरुणानांतरस्विनां॥५४॥एवंतुमहिषीदानात्पतिरप्सरसांभवेत्॥कल्पमेकंवसेत्तत्रभुंक्तेभोगान्यथेप्सितान्॥५५॥वर्षारात्रक्षमा
भूमिंद्विजायप्रसहंददन्॥ब्रह्मलोकंसमासाद्यकल्पस्यापिभवेन्नरः॥५६॥अन्वहंयःसहस्राणांविप्राणांभोजयेन्नरः॥तापीतटेकारयतिससलोकंसग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छति॥५७॥कल्पमेकंसवैनरः पूज्यतेविविधैरपि॥ततोमोक्षपदंयातियत्सुरैरपिदुर्लभं॥५८॥वित्तशाठ्यंपरित्यज्यस्वशक्त्यापरतुभोजयेत्॥शतो
ष र्द्धंवातदर्द्धंवातेशांत्वथापिवा॥५९॥विंशतिंवाचतुर्वुकामथद्वादशभोजयेत्॥तदेवफलमाप्नोतितथाएकंचभोजयेत्॥६०॥वस्त्रदानान्नरोयातिलो
कंश्रेष्ठंप्रजायते॥दुकूलदानशक्तोपिवस्त्रंकार्पासिकंददौ॥६१॥नतस्यफलमाप्नोतितस्यदानंनिरर्थकं॥तांबूलदानात्पुरुषोभोगैर्नपरिहीयते॥६२॥
फलदानाभवेद्धितिसंततेप्राप्नुयान्नरः॥उपानहौनरोदत्वापादचारोनजायते॥६३॥ताम्रकांस्यंमारकूटंजलपात्रंददातियः॥पायसंयावकंस्मोतेवदेपी
यूषयोभवेत्॥६४॥रूप्यदानात्कलत्राणिसुरूपाणिलभेतिच॥गोधूमशालिमुद्गानांतथैवयवमाषयोः॥६५॥ब्रीहिणांचतिलानांचक्षेत्राणिफलवंतिच॥
ददातिकालेसंकल्पतस्यपुण्यंनिबोधमे॥६६॥यावंतोहिकणास्तेषांतत्तुल्यंपुण्यशंकया॥वर्षाणिवसतेस्वर्गेदैवतातुल्यभावयेत्॥६७॥अन्येषामपि
धान्यानांदत्वाक्षेत्राणिमानवः॥तद्विजसंख्ययास्वर्गेवर्षाणिसहनिर्जरैः॥६८॥रममाणोयथाकामंवासायुरवलुकल्पते॥गृहंददातियस्त्वान्येत
स्यपुण्यफलंश्रृणु॥६९॥निर्येकभूमिकंवापिदृषाषाणातिनिर्मितं॥चित्रितंवर्णकैश्चित्रैःसर्वोपस्करसंयुतं॥७०॥सविष्णुलोकमासाद्यस्व
र्णरत्नविनिर्मितं॥प्रासादेरमतेनित्यसर्वोपसुरसंयुतो॥७१॥सहदिव्यपुरंध्रीभिःकल्पंयावन्मुदान्वितः॥तावत्कालंवसेद्ब्रह्मलोकेदत्स्वे
ष्टिकार्यंच॥७२॥गृहकाष्ठप्रदंदत्वाशक्रलोकेप्रयातिसः॥यावत्कालंचैतेचंद्रतावत्कालमवस्थितिः॥७३॥दाताऽत्रस्पष्टधान्यानांनिजवित्तानु
सारतः॥खारिद्रोणाढकप्रस्थकुडवानांचसंख्यया॥७४॥सस्वर्गेनिवसेद्धृष्टोवर्षाणिद्विजसंख्यया॥पूज्यमानःसुरैर्नित्यंविमानेप्रियइच्छया॥७५॥
स्वर्गेलोकेवसेत्कल्पान्निजवशात्यातिलान्ददन्॥गोधूमदातांकल्पंतुस्वर्गेतिष्ठतिहर्षितः॥७६॥स्वर्गोसापभयंनेवपापादाताहिविंदति॥दा
ताहितंदुलान्यस्तुमहर्लोकेसतिष्ठति॥७७॥घृतंददातिविप्रेभ्यःस्नानंकुर्वन्दिनेदिने॥स्वशक्त्याससुधाहारोदेवतानांप्रियोभवेत्॥७८॥दुग्धं
वादधिवायस्तुब्राह्मणेभ्यःप्रयच्छति॥स्वर्गलोकेसमासाद्यघृतकुल्यापतिर्भवेत्॥७९॥अन्नदानेनलभतेयद्यदिच्छतिमानवः॥अन्नात्सरस्वतीदा
नेनभूतंनभविष्यति॥८०॥नरःपुस्तकदानेनज्ञानवान्निश्चितंभवेत्॥विद्यादानेनमोक्षंचलभतेकर्मसंक्षयः॥८१॥यस्मिन्यस्मिन्भवेदिच्छा
तत्तदद्यात्प्रयत्नतः॥इहलोकेपरस्मिन्वानान्यथालभतेक्वचित्॥८२॥स्त्रियोदानफलंह्येतद्भर्तृभिःसहभुंजते॥तत्रलोकगतास्तल्लोक
पंयांतिचभर्तृषु॥८३॥यस्मिन्वयसिकालेवायथादत्तंमहात्मभिः॥तस्मिन्वयसिकालेचतत्तथैवचलभ्यते॥८४॥पुण्येदेशेशुभेकाले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आषा०म०
॥६॥

श्रद्धयापरयातथा॥ शुभंद्रव्यंसुपुत्राययद्दत्तंहितदक्षयं॥८५॥ यद्गवादिकदादानंफलतीहत्वततथा॥ यस्माच्चददतिश्रेष्ठंतदर्पेश्रद्धान्वितः॥८६॥
अदत्तस्यत्ववृत्तस्य फलप्रसक्ष्मीस्यते॥ एकेदरिद्रादृश्यंतेधनवंतस्तथापरे॥८७॥ समानकुलजाताश्चसमानमतयस्तथा॥ तथासमानक
र्माणःसमानेंद्रियवृत्तयः॥८८॥ समदत्ताविभागाश्चतामेनंस्वधनंप्रति॥ तथापिकेचिद्दृश्यंतेधनवंतस्तथापरे॥८९॥ सधनःपित्ततःकश्चित्त
थाकश्चिच्चनिर्धनः॥ तयोर्विपर्ययोदृष्टःकारणंदत्तमेवतत्॥९०॥ सर्वेपिधनवंतस्तुरदत्तंयदिलभ्यते॥ परलोकेचकिंचिच्चश्रूयतेदुर्गतिःकिल॥९१॥
तस्मादिहोप्यमभ्यस्तानादत्तंभुज्यतेक्वचित्॥ एकेनिश्चितसंदेयंहिनिजरात्वपुसारतः॥९२॥ आषाढेतपतीस्नानात्पापकर्मक्षयोभवेत्॥ अभ
क्ष्यीयतेकर्ममानवैर्केवयत्कृतं॥९३॥ दृश्यतेचेहमाप्तस्यफलंपुण्यस्यकर्मणः॥ दुःखात्मकेपापफलंपुण्यस्यतुसुखात्मकं॥९४॥ यथेहचत
थापुत्रपुरुषःकर्मणोवशात्॥ सुखदुःखमवाप्नोतितस्मात्पापात्मकंत्यजेत्॥९५॥ दृश्यंतेसुखिनःकिंचिद्धनपुत्रयुताजनाः॥ दीर्घायुषोनिरुज
श्चानिर्भयागुणिनोनरः॥९६॥ अपरेपिचदृश्यंतेरोगार्ताधनवर्जिताः॥ अल्पायुषोपिपुत्राश्चानिग्रहागुणवर्जिताः॥९७॥ तस्मात्पुण्यंचपापंच
निश्चिंत्याश्मीतिमानवः॥ स्यात्सुपुण्येधादरेपरोनपापेषुकथंचन॥९८॥ आषाढाख्यतपतात्पुण्यंपरमस्तीतिभूतले॥ धर्मदृष्टश्चपूर्वंतश्च
नास्त्यतोतत्समावुभौ॥९९॥ वांछितार्थस्यसंसिद्धिर्येनायासविनालभेत्॥ अन्यपुण्यंबलाधिकंकिंचास्तियंनिगद्यते॥१००॥ यावंतोमुन
यःसिद्धाआषाढस्नानादिह॥ नसंख्याशक्यतेकर्तुंनापिवर्षशतैरपि॥१॥ ब्राह्मणाःक्षत्रियावैश्याःस्त्रियःशूद्रास्तथापरे॥ सर्वेषा
मधिकारोपितथाचाश्रमिणामपि॥२॥ लोकार्थिनोधिगच्छंतिलोकान्मनसईप्सितान्॥ आपिमोक्षार्थिनांमोक्षंआषाढेस्नानतोभवेत्॥३॥
जयार्थिनश्चविजयंबलार्थिनोपिबलोन्नतिं॥ रूपार्थिनोपिरूपत्वंलभतेनात्रसंशयः॥४॥ अगस्त्येनपुराराजानहुषोनामविश्रुतः॥ विप्र
यत्नकरंशीघ्रंपातितोवज्रात्सदात्॥५॥ ततोदीनोविवर्णोसौमहसाच्चरपायुतः॥ कस्यापानानमात्मीयंनदर्शयितुमीश्वरः॥६॥ ॥राम॥
तेनगत्वावशिष्ठस्यसप्राणिपत्यमुमुक्षुः॥ कृतांजलिपुटोभूत्वाप्राहगद्गदयागिरा॥७॥ स्वकीयाज्ञानतःपापंकृतंव्यत्रकुबुद्धिना॥ यच्चाद्वि ॥६॥
जानावोद्यास्तेतेनमेदृश्यतेमनः॥८॥ तेनैनसापापातितोहंजन्मतमपवाल्यदात्॥ निःकृतिंकिंकरोम्येवनचशक्नोविजानितुं॥९॥ येनाहंदुरितात्स्वे
द्येनमादात्तदारुणात्॥ तद्ब्रूहिमेमहाभागलभेयेनसमाहितं॥१०॥ नत्वाशरणमापन्नेमामुद्धरमहामुने॥ इतिसंश्रुत्यतद्वाक्यंवसिष्ठोमुनिसत्तमः॥११॥
कृपयापरयायुक्तोराजानंमिसभारत॥ वासिष्ठउवाच॥ अविमृश्यनकार्याहिकार्यंकिमपिपंडितैः॥१२॥ अमावित्स्वष्टकार्यस्याविपाकोदारुणोमतः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वयेंद्रपदसंप्राप्ते नोत्सुक्यां सहसाकृतं॥१३॥ तत्कार्यं तस्य संप्राप्तं फलमेवं विधं त्वया॥ कामाद्यः शरीरस्था महांताः शतवो ह्यमी॥१४॥ कार्यं
तैयैरसत्कर्म पुरुषः स्ववशाकृतः॥ इहामुत्र चयेनासौ नीयते दारुणां दशां॥१५॥ तस्मादेते विजेतव्या लोकहृदयहितैषिणा॥ लोभेन त्वं बुल
वता प्रापितोसीदृशीं दशां॥१६॥ चित्तसंशोकजननीं सर्वलोकविगर्हितां॥ राजस्त्वं तपतीगंगावा सर्वभोगविवर्जितः॥१७॥ एकाग्रमनसा सा
स्नाशुचो स्नानं समाचर॥ तेन त्वं गतपापस्तु लप्स्यसे वांछितं फलं॥१८॥ तान्यः कोपि तवोपायो विद्यते तत्र निश्चितः॥ नकुषउ॥ एकः शत
बली राजा स्वपदं योजितः कथं॥१९॥ शत्रुणा तत्पुनः प्राप्तं कथमेतं निगद्यतां॥ वसिष्ठउ॥ पुरा शतबली राजा शत्रुणाक्रांवितः पदात्॥२०॥
पुनः स्वपदमापन्न आषाढस्नपनात्परं॥ वंगानामधिपो राजा भवच्छत्रुबलिः पुरा॥२१॥ ततो वंगकलिंगाद्या जिता देशाः स्ववीर्यतः॥ स
कदाचिद्ययो राजा कामरूपेश्वरं प्रति॥२२॥ युद्धतत्राभवद्घोरं अनेकैः सुभटैः क्षयं॥ तस्मिन्राजन्सुबहुशोमृता अश्वगजा नराः॥२३॥ मा
नुषाणां च पतयो बभूवुरस्सरोवराः॥ यत्र त्वग्रुधिरं स्नात्वा सानमत्तः पुनः पुनः॥२४॥ नृत्यंति सन्नगायंती भूतवेतालराक्षसाः॥ यत्रा
युध्यंतसुभयास्त्र चामरणजं भयं॥२५॥ बाणैः कुंतैश्च खड्गैश्च पट्टिभिः शक्तिभिस्तथा॥ यतं प्राति प्रहाणाय प्रहृतः शत्रुनाकरोत्॥२६॥
उरीचकारमरणं सुभयेन पलायिनं॥ शिरोभिर्बहुभिः सार्द्धैरन्यैरवयवैस्तथा॥२७॥ पतितैस्सुभयसनासारणभूदुर्गमाभवत्॥ वाजीवा
रणवीराणां देहेभ्यः पातितः क्षतात्॥२८॥ नद्यस्यतेस्म कीर्णा भूरस्रग्जा सरसास्त्रिभिः॥ क्रव्यादगणसंकीर्णं तदासीत्संगरं महत्॥२९॥ शूराणां
हर्षजननं भीरूणां भयवर्द्धनं॥ तस्मिन्महति संग्रामे वर्त्तमाने सुदारुणे॥३०॥ कामरूपेश्वरबलं संग्रामायपपलायितः॥ क्षात्रियामापलो युद्धं भोभो
तिष्ठतातिष्ठत॥३१॥ क्षत्रधर्मं परित्यज्य पपालाप्यप्रयास्यथ॥ स्वोपधर्मपरिभ्रष्टा दर्शयिष्यत किं मुखं॥३२॥ एषकोकः परश्चापि हतयं वो
विनश्यति॥ पश्चादपिहि मर्तव्यमितिमत्वा निवर्तता॥३३॥ केलोकावो भविष्यंति पश्चाद्यद्दिमरिष्यथ॥ इति शूरवचः श्रुत्वा निवृत्ताः केपि
तत्रते॥३४॥ तेनिवृत्य सम्बधं चक्रुर्दारुणं रोमहर्षणं॥ कामरूपेश्वरो राजा योधयन्परवाहिनीं॥३५॥ ततः शतबलिः प्राप्तस्तयोर्युद्धमभूत्तदा॥
परस्पराकर्षितयोः परस्परवधैषिणोः॥३६॥ कामरूपस्य सविभुः कोपामर्षवशंगतः॥ अर्द्धचंद्रनिभाभ्यां सनिशिताभ्यां महाबलः॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आपाढम० छित्वाधनुः शतबलो छत्रं चिच्छेद वीर्यवान्॥ ततोन्यधनुरादाय कोपाच्छतबलिः पुनः॥३९॥ दृढं विव्याध हृदये नाराचेनोग्ररोचिषा॥ सो अ०२
॥७॥ तिविद्धो बलवता रिपुणा रिपुसूदनः॥३९॥ मूर्छयागतचैतन्यो रथोपस्थ उपाविशत्॥ तत्क्षणाच्चेतनां प्राप्य गृहीत्वा त्वरितं धनुः॥४०॥
छित्वा शतबलेः सारथ्यानौ चावधच्छरैः॥ ततः क्रुद्धः शतबलिर्नितांतं सारथौ हते॥४१॥ स्वयं रश्मीन्समादाय युद्धे रिपुगणासहा॥ नाराचा
स्त्व आदाय सुतीक्ष्णान्कंचुकं छिदः॥४२॥ चतुर्भिश्चतुरो वाहाननैषीत्तस्य वेगतः॥ पंचमेन ततश्चाशु चिच्छेद सारथेः शिरः॥४३॥ हते
घश्चेषु राजा स ससारथौ च ततो रथात्॥ खड्गमादाय वाशीघ्रं सखेटकमथाभ्यगात्॥४४॥ ततः शतबलिस्तस्य छित्वासिमपतत्पुनः॥ मौलौ
जघान खड्गेन हतां तामवरन्वभूत्॥४५॥ खड्गप्रहारमूर्छितं विक्लवं पतितं भुवि॥ जीवग्राहं स जग्राह वाचानिर्भर्त्सयन्मुहुः॥४६॥ स शत्रु
वशमायातो किंचित्त्रासं च भावितो॥ ततः शतबलिः स्वस्य सर्वस्वमग्रहीद्बलात्॥४७॥ न चाददायन निर्दंतिं गंगाप्रापमहायशाः॥ ततो निवेश
यामास सैन्यं गंगातटे बली॥४८॥ तत्राप्यच्युतदूषिवरां चरतः परंतपः॥ शुष्कपर्णाकाश्चित् कांश्चित्केचिद्वाताम्बुजायिनः॥४९॥ महापराक्रिणः कां
श्चित्कांश्चिच्चांद्रायणे रतान्॥ तान्सर्वान्स नमस्कृत्य प्रत्येकं महदाहरात्॥५०॥ तैः सर्वैः कुशलं पृष्टो राजोद्वातदाशिष॥ स तैरुक्तेपुनरिदं
कृतं शतबले त्वया॥५१॥ क्षात्रसद्दकर्म धर्मकामरूपी पदग्रही॥ क्षत्रियाणां जयो मृत्युः संग्रामे नापलायनं॥५२॥ एतन्नद्विघ्नतां लोके न दोषोस्ति
हि कश्चन॥ अत्र धर्मः पाल्यतः भग्नसैन्येपि योग्रहः॥५३॥ तासोपुण्याय राजेंद्र तस्मादेत द्रुतसज॥ निश्चितो न जयः कस्य भंगो वा कस्य निश्चितः॥५४॥
विजयं तत्र शत्रून्ये भज्यते तत्र कर्हिचित्॥ एतावन्निश्चितो यस्मा ज्ञात्वेह विजयेच्छुभिः॥५५॥ शत्रुर्विपदमापन्नो न कार्यश्च कथंचन॥ संग्रामे पतितो ॥राम॥
वीरो जीवन्नापि मृतोपि वा॥ स कर्तव्यः सरिपुभिः कोपामर्षौ विहाय च॥ संग्रामे पतितं वीरं ये घ्नंती घातयंति वा॥५७॥ ब्रह्महत्यासमं पापं तेषां ॥७॥
स्यामुनयो ब्रुवन्॥ युक्तो बद्धं चाहतं च न बाहामिति वादिनां॥५८॥ क्षात्रियं ये त्र निघ्नंति ब्रह्मघ्नास्ते प्रकीर्तिताः॥ वैरिभिः स्वामिनं बद्धं स त्यक्त्वा प्राण
परायणाः॥५९॥ क्षत्रियायो निवर्त्तंते तेषां हत्यापदे पदे॥ यावज्जीवं स्वामिनोन्नं वित्तं शस्त्रा विभूषणं॥ उपयुज्यापुध्यतां च गर्दभं च भवालरो॥ शत्रुरप्या
पदं प्राप्तो न हंतव्यः कथंचन॥६१॥ विक्रीतो स प्रतीक्षस्याद्यावत्तां प्रत्नरेदिह॥ याचनीतिरितिप्राह व्यसने सति सर्वदा॥६३॥ प्रहर्त्तव्यो विपक्षस्यात्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थास्योपनयेसति॥प्रावाहिकंतुवचनंनचैतत्पारमार्थिकं॥६२॥कर्मवत्स्यंजगादिदंवदवस्योनमानवः॥कर्मायत्तोदृष्टकर्मोकर्मायत्तःप
राजयः॥६३॥बुद्धिःश्रीश्चसुखंदुःखंसर्वंकर्मानुगामिच॥अन्यन्मांकिमसक्षार्थराज्यंस्यात्कस्यचित्पुनः॥६४॥सुबद्धंयातिकस्याप्ति
सहसादेतेचिंतितं॥यस्यैवसर्वसौख्यानिदृष्टायघतरस्यच॥६५॥तस्यकालेनदृश्यंतेकथंकर्मनकारणं॥सहसाच्चमहाव्याधेरागयःक
स्यचिद्भवेत्॥६६॥धनागमस्यकस्यापिकथंकर्मनकारणं॥कस्यचिद्यापदोदृष्टासहसाप्यधनंतथा॥६७॥एतानीतिविनिश्चिसकर्म
कारणमुच्यते॥अन्यपुरुषाकारगातिमन्यंतेतत्तुनिश्चितं॥६८॥तत्रापिप्रासिचारोहिदृश्यतेकर्मणोवशात्॥कर्मवशात्पुरुषस्ययादृशी
र्मावितद्यथा॥६९॥कर्मणांविष्यायुच्छातत्करोतिप्रयत्नतः॥दैवमेवहितस्माच्चमन्यासःपरमेवयं॥७०॥दैवेन्नत्सर्वमाप्नोतिदैवेनचपरा
क्षतं॥नधर्मवधमाप्नोतिनैरज्यंचसरोगता॥७१॥उयक्षयादिकंचैवसर्वंदैवप्रातिष्ठितं॥असौदैवाच्चविपदंप्राप्तस्वंपितृजंपदं॥७२॥त
स्मादेनंविमुच्याशुत्रराराज्यनत्यागते॥ऋषीणांवचनात्सोथविमुच्येनमहात्मनः॥७३॥मुनीनाद्दष्टवाविषयांस्वांजगाममुदान्वितः॥का
मरूपा[illegible]धिपश्चायमृषिभिर्मोचितस्तदा॥७४॥विवर्णवदनोमर्षल्लज्जाशोकपरिप्लुतः॥गंगायाःसलिलेस्नात्वानत्वाचध्व ध्व्यमुपा
गय॥७५॥ब्राह्मंसरोजगामाभ्रदिद्वादारांस्तपुत्रकान्॥राज्यंसंसांगकेयत्कारोशोकमर्षवशंगतः॥७६॥निरंतरंश्वसन्क्षामोनिरभीभृत
पन्नगः॥मानिमानंस्याजितोहिवरान्प्राणान्परित्यजेत्॥७७॥कथंचिन्नापिलोकानांदर्शेपस्यात्मनोमुखं॥तत्रस्थित्वाचिरंदध्यौकिमन्नममसांप्रतं॥७८॥
जुहोमिखंडशःकृत्वावह्नौदेहमिमंकथं॥किंवाकंठेशिलांबध्वामज्जयामितिजातनु॥७९॥अथवाभ्युतःपातंकृत्वामनाज्मिविग्रहं॥अथ
वाग्रेणतपसाराधयामिमहेश्वरं॥८०॥ततश्चतपसाशीर्णयिष्यामिचकलेवरं॥ततःसतपआरंभेविचार्येतिमुहुर्मुहुः॥८१॥निसंन्निषवणं
कुर्वन्त्रिःकृत्वाःपूजयेच्छिवं॥शिवंमंत्रान्जपान्निसंशिवध्यानपरायणः॥८२॥तत्रोरजेसमाधायवन्हिंचाविधिपूर्वकं॥त्रिवारंसामिधाहोमंयाजि
यानांसमाहितः॥८३॥एकंकृत्वावदसेवंशंकरप्रीयतामिति॥संध्यापांचततःसाध्यंविकृत्वासमाहितः॥८४॥स्वपितृतर्पणानांचआहारंकु
रुतेवसः॥एवंवर्षत्रयंसाग्रंजातस्यमहात्मनः॥८५॥अथैकस्मिन्दिनेराजामध्यान्हस्नानानिर्गतः॥एवंसतिमगःकश्चित्तत्समीपंसमागतः॥८६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आषाढ० उच्चावचाकुलत्त्रस्तो मुंचसेनं मुऊर्मुर्खा। पश्चाद्विलोकयद्रूपः कंपमानो भयातुरः॥१८७॥ राजानंदी नयाद्दृष्ट्वा वीक्षते सान्तःस्थितः॥
॥८॥ नृपोपिकृपया विद्धो हृष्टामृगमभाषत॥१८८॥ माभैर्मृग परित्राणं प्राणैरपि करिष्यति॥ एवं वदति भूमिशे तत्र व्याधाः समागताः॥१८९॥
साधिज्यशारधन्वानो मार्यतामिति वादिनः॥ योरिपुस्ते यराजानं सम्मृगं बलवाङ्घितां॥१९०॥ अथो पुरुषराजानं मृगो नोयप्रदीयतां॥ नराखि
नो न युक्तस्ते हरणं परवस्तुनः॥१९१॥ अथवा न तपस्वी त्वं कपटी पश्यतो हरः॥ एतत्कृते वयं भ्रांता मध्यदीनां महं बाधितां॥१९२॥ यावंतेषां
नयान्मास तावेद्रुल्लासि किंछलात्॥ नूनं हंतुमशक्तस्त्वं कपटेन जिघित्ससि॥१९३॥ ज्ञातं वैते मुनित्वं हि मृगार्थं क्रियते त्वसत्॥ अस्माकं
मिषतां चायं कुरंगः केन लक्ष्यते॥१९४॥ अविलंबेन देह्येनं विलंबस्ते वदारुणः॥ इति तस्या वचः श्रुत्वा राजा गर्वसमन्वितो॥१९५॥ प्रत्यु
वाच ततो दान्तस्वरेण वर्जयन्निव॥ यादृशाः पापिनो पूर्वै तादृशां वचनं हिवः॥१९६॥ अथवा हृदयं पावन्नादृग्वाचि प्रवर्तते॥ यद्यहं रतपस्वा
स्यां माभूयं विमतेन किं॥१९७॥ नष्टमं स्यापि खलैनं चांडोलं शरणागतं॥ गृहीतुं नगतेस्मैनं मया नकारितोद्यसौ॥१९८॥ अतर्कितः समायातः श
रणार्थी भयातुरः॥ जीवलकृषं सजाप्येनं मृ सोढहरितः स्वलुच्यकाः॥१९९॥ परार्थे नश्वरा प्राणान्दुष्करो जरतो नु किं॥ मन्यमानो बहूपणान्यस्त
जेच्छरणागतं॥२००॥ स्वल्पगतेषु प्राणेषु स्थितं ते सारापातकं॥ शरणागतनाशे तस्मात्प्राणान्त्यजेद्यस्त्वविचारयेत्॥१॥ स्वापायित्वानु विपुलान्
कीर्तिसूर्याति यन्नरः॥ यन्ने ह्यादि पदप्राप्तिमरणे मोक्ष एव वा॥२॥ इह कीर्तिश्च विपुला तत्र कास्ति विचारणा॥ नेलोक्षोयत्र कोपि स्यात्सम्यु न स्या
दुर्गतिं॥३॥ न तन्मरणमान्विच्छेत्तन्नात्मा रक्ष एव हि॥ इति मे निश्चयं मत्वा कुनारो मम घातनं॥४॥ मृगो मे हन्यतां व्याधा रत्नास्ति विचारणं॥ इति ॥राम॥
तस्य वचः श्रुत्वा व्याधा ऊचुरनंतरं॥५॥ अहो नेदितपस्वीत्वं तनुं त्यजसि किं वृथा॥ सत्कर्म कुर्वता कालं जीवतां हि शतां हिनः॥६॥ विचारस्तु विरव ॥८॥
लुब्धगार्थं जीवितं त्यजेत्॥ रक्षणेन मृगस्यास्य पुण्यं तन्नु दिने दिने॥७॥ तप्यमानस्य च तपस्तस्माद्रक्षानिजां तनुं॥ निरक्षो रक्षणे कास्या पुण्यं वा
चोत्मघातिनः॥८॥ तु स्यार्थं भवितायन्नक्षोग्यं वर्षशतैरपि॥ भक्ष्या हि पशवः पुंसां तदर्थं नीयते न कः॥९॥ साधनं देवपित्र्यर्थं कथं तद्धन्यते वि
ना॥ रक्षनास्य हितावत्स्वं मनो जीव सुखभागयं॥१०॥ निहतः पितृदेवार्थं प्राप्नोति दिवं पशुः॥ हत्वेह व्यक्तं पापं दास्यामास्तिद्विजन्मना॥११॥ तेरर्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हव्यक व्यत्त्वंनावस्वर्गंप्रयस्यहि॥ अथत्वयामोक्षितोयमात्मदानेन चापरे॥१२॥ निहनिष्ये प्यंतकालेनकिंतु व्याम्यंतकाः॥ मृगार्थंम्रियमाण
स्य किंपुण्यंतेभविष्यति॥१३॥ तस्माद्दुरात्महेमुंचत्यजज्ञंमोहसंभवं॥ पौनःपुण्येनात्रवयं कुर्मस्त्वद्धितकाम्यया॥१४॥ किंकरिष्यामोन्यथा चार्य
-- मृगार्थिनस्य च॥ इति व्याधवचैः श्रुत्वाप्राहसंवन्हिसंनिवं॥१५॥ मद्धिनेचोन्निकर्षोवनतर्ध्येव यंरक्षतां मृगः॥ तस्मात्सरतरंनास्ति मद्धितं लुब्ध
काः खलु॥१६॥ मयापरिरक्षणीयोहि चेतसोतद्विनिश्चितं॥ किंप्रयोजनमत्रास्ति पश्चान्मरणशंकया॥१७॥ विनेक्ष्यतीति कृत्वार्यरक्षणीयंनर
श्यते॥ अथवाकिंनरक्षः स्याद्यज्ञार्थमाहतः पशुः॥१८॥ रक्षणेयद्विशक्तिः स्यान्नदातव्यप्रतिरोधिनः॥ यज्ञार्थपित्तद्देहस्तु भुनाभ्यसत्कृते किल॥१९॥
विश्वामित्रेणचकथंस्वप्रभावोनरक्षितः॥ तद्रक्षणेश्वतैः प्राणैः परप्राणप्रशोधिभिः॥२०॥ नातःपरतरंलोके पुण्यमस्तीहकिंचन॥ शिबिरौ
शीनरो रक्ष्यन्स्वदेहेनकपोतकं॥२१॥ विस्तार्येहयशोराशिं स्वर्गलोकमतोगतः॥ तस्माच्छाधाम्मृगस्यास्यनिःक्रियोपायान्व्यतां द्रुतं॥२२॥ चक्र
भावंपरित्यज्य मथिकृत्वासुचित्ततां॥ ततस्तमवदन्व्याधाः यत्तुयेवविनिश्चितो॥२३॥ अस्मात्स्वशिरोदेहि मृगस्यायंहिनिःक्रियः॥ ततोराजाह
श्रमनाः गृह्यतां मच्छिरोद्रुतं॥२४॥ इत्यब्रवीत्सतान्व्याधांस्तर्वांश्चपरितुष्टितान्॥ यावद्यातिमृगोह्यस्मात्तावत्कालंप्रतीक्ष्यन्ताम्॥२५॥ एवमु
क्ततो व्याधान्मृगाहि त्वातुदूरतः॥ मुमुचराजायेनासौक्षिप्रयातोवनांतरं॥२६॥ व्याघ्रस्यायत्ततोराजाप्यायचयौ व्याधसंनिधौ॥ गृहीतमच्छि
रोव्याधा विलंबोमाभवेदिह॥२७॥ ततस्तस्यवचः श्रुत्वाप्रसभाषंतलुब्धकाः॥ नवयंतापसंहन्मोनोदासीनमात्रिणं॥२८॥ अपुष्पमानभी
तश्चतवाहमितिवादिनं॥ तस्मात्त्वंस्वयमुत्कृत्य स्वशिरोदेहिनः कृते॥२९॥ सत्येनानिःक्रियोपास्यमृगस्ययदिमन्यसे॥ ततस्तेभ्योथवाचित्वा
राजास्थंतीक्ष्णमात्मनः॥३०॥ प्रचक्रमेनिजशिरः कर्त्तितंनिजकारणात्॥ एतस्मिन्नंतरेदेवोभवांश्चशशिशेखरः॥३१॥ आजगामगणैःसार्द्धं पं
चास्योरगबाहुकः॥ अथात्मचन्दपंप्राहमाकाशरसाहसंन्वपं॥३२॥ तुष्टोस्मीतिवरंब्रूहियत्तेमनसिवर्त्तते॥ इत्युक्तंतंचराजानंछिद्दानस्त्रिशि
रैः करैः॥३३॥ जग्राहाथमहादेवस्तद्धस्त्याहतमानसः॥ यावत्समीक्षतेराजा तावद्दग्नेनलुब्धकाः॥३४॥ ददर्शश्रीमहादेवंदेवदेवमुमा
पतिं॥ दृष्ट्वाथशंकरराजास्वसमीपमुपस्थितं॥३५॥ जानुभ्यामवनिंगत्वाप्रणनामपुनःपुनः॥ नत्वापुनःपुनर्भक्त्यास्तोत्रमेतदुवाचह॥३६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आषाढ०म० राजोवाच॥ नमस्तुभ्यं भगवते बालचंद्रार्कधारिणे॥ देहार्द्धे बिभ्रती देवी पार्वती तेन मो नमः॥३७॥ नमस्ते कालकूटाय नीलकंठपते नमः॥ अ
॥१०॥ घमूर्तेनमस्तुभ्यं नमः कालापहारिणे॥३८॥ नमः कालाग्निनेत्राय शंकराय नमो नमः॥ नमो ब्रह्मस्वरूपाय नमस्ते विष्णुरूपिणे॥३९॥ नमो महे
शरूपाय सर्वदेवात्मने नमः॥ पुरांभिदे नमस्तुभ्यं दक्षाध्वर विनाशिने॥४०॥ परापरस्वरूपाय सृष्टिसंहारहेतवे॥ सर्वज्ञाय नमस्तुभ्यं स्थूलरूप
धराय च॥४१॥ नमस्ते सूक्ष्मरूपाय अरूपाय नमो नमः॥ त्रयस्त्रिंशाय देवाय भूतानां पतये नमः॥४२॥ नंदीवाहन नमस्तुभ्यं नमस्तुभ्यं दवीयसे॥
वर्षीयसे नमस्तुभ्यं महिष्ठाय नमो नमः॥४३॥ गृहीतरजसे विश्वसंभवे मृडरूपिणे॥ नमो रूपाय संहारहराय तेन मो नमः॥४४॥ सत्वोपसेभव
तोपि नित्रैगुण्य शिवाय च॥ नमो नमो महादेव प्रसीद परमेश्वर॥४५॥ इति स्तुतस्तदा राज्ञा देवदेवो महेश्वरः॥ प्रसन्नवदनः प्राह ब्रूहि मत्तोभि
वांछितं॥४६॥ ततो सौ प्रणिपत्याह शंकरं लोकशंकरं॥ वचसः कारणं सर्वं चिरं स हृदि संस्थितं॥४७॥ शत्रोहं शतबलिना पराभूतः पुनः पुनः॥ स्व
पदात्याजितस्तस्माद्याचे त्वामेव देव हि॥४८॥ एतस्य स्वपदभ्रंशो यावज्जीवं भवत्विह॥ तपोभिर्यजनैश्चैव तीर्थैर्बहुविधैः कृतैः॥४९॥ स्वपदस्य
पुनः प्राप्तिर्माभूद्येतद्विधीयतां॥ यथा भ्रष्टो सि सततं पदभ्रष्टः सदैव हि॥५०॥ तस्यैव वचनं श्रुत्वा प्राह देवो जगद्गुरुः॥ आषाढ सर्वं भुक्ता
तपसां सर्वकामदं॥५१॥ अन्यैः सर्वैरुपायैस्तु सुकृतैरपि यत्नतः॥ न तस्य पदसंप्राप्तिः कथंचन भविष्यति॥५२॥ तव स्वपदसंप्राप्तिर्भविष्य
ति पुनस्तथा॥ अतो मम प्रसादाद्वाप्तिर्भविता तव भूमिप॥५३॥ इत्युक्त्वा देवदेवोपि तत्रैवांतरधीयत॥ राजापि स्वपुरं प्राप्य लब्ध्वा राज्यमकंटकं॥५४॥
पूर्ववन्मुमुदे तत्र शंकरस्य प्रसादतः॥ कामरूपो श्वरो यावच्छक्तिमान्सैन्यसंयुतः॥५५॥ प्रतिष्ठितेरातबलिः पूर्ववैरमनुस्मरन्॥ तावद्राज्यपरि
त्यज्य स प्रायो निर्गतिः पुरात्॥५६॥ स तस्माद्धूर्जटिवरात् राज्यभ्रष्टोप्यजायत॥ भ्रमन्महाभूः सकलां शोकामर्षसमन्वितः॥५७॥ अष्टराज्यो
गतः श्रीको नाविंदत्सुखं क्वचित्॥ गिरिशस्य प्रभावेन पातितः स्वपदादपि॥५८॥ किं करोति स कोप्यस्ति योरुद्रेण विरुध्यते॥ पुण्योति द ॥राम्र॥
ज्ञानायेन पातिताहितया बलात्॥५९॥ वज्रिणस्तंभिनं वज्रं कस्तेनस्पर्द्धये दिह॥ इंद्रादिपददानां च तस्मादन्यो न विद्यते॥६०॥ वराभिधारि ॥१४॥
णोदेवदैत्यदानवपन्नगाः॥ गिरिंतरस्समासाद्य यस्य द्वारमुपासते॥६१॥ आराधनाच्च यस्मात्ते स्वानि स्वानि पदानि ते॥ लभंते तं पुष्यध्वं तं महिम्नाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रसादतः॥६२॥योदद्यात्सत्रूसर्वेशः पदानिसुमहंस्यपि॥सचेत्पदाच्यावयतिविषादः क्रियतेत्वकः॥६३॥सदूरस्त्वजन
वज्जातपादचारिगतानुगः॥विपेत॥कांतिनिर्भूतिरेकाकीनिश्वसन्मुहुः॥६४॥कदाभाविनिकल्याणीमार्कंडेयाश्रमंययौ॥
दृष्टःसमुनिनातेनकृतातिथ्यउपाविशत्॥६५॥नमस्कृत्यमुनिंसोथकृतांजलिपुटस्थितः॥मार्कंडेयेनसपृष्टःकिंमलं
वसनंतुते॥६६॥कस्मात्त्वमिहसंप्राप्तोराजन्नेवंविधाह्वयं॥कतेगतंमहाराज्यंक्वचतेमत्तदंतिनः॥६७॥क्वतेलक्ष्मीःक्व
तेमात्याःसहायाःक्वचतेगताः॥सर्वमेकपदेभ्रष्टंस्वप्नदृष्टंप्रबोधवत्॥६८॥धिग्संपदोमहाकष्टैरर्जिताःक्षणभंगुराः॥
सत्कर्मवत्रागास्ताहिकर्मवापिक्षयात्मकं॥६९॥सतीषुतासुगर्वोनिंनाविषादोगतासुच॥कार्यपिचिंतापरमाच्चंचलास्ता
निरंतरं॥७०॥इत्युक्तस्तुततोराजामार्कंडेयेनधीमता॥सर्वंनिवेदयांचक्रेस्वराज्यभ्रंशकारणं॥७१॥कृतमाराधनंश
भोकामरूपाधिपेनतु॥जितेनशत्रुणायद्वत्तोषितोभगवान्हरः॥७२॥तस्माच्चतद्वरंप्राप्तिसर्वमेतन्निवेदितं॥विन
यावनतोभूत्वापुनःपप्रच्छतंमुनिं॥७३॥महर्षेहंमहेशेनस्वपदाद्भ्रंशितःकथं॥अध्यापनंमहेशस्यनमयाविहितंक्वचि
त्॥७४॥जगत्पितामहादेवोमित्रशत्रूतुतस्यकौ॥अपवर्ज्यजगत्सर्वंनिःकृतोभूत्कथंमयि॥७५॥इतितस्यवचःश्रुत्वा
प्रसभाषततंमुनिः॥क्षणंध्यानपरोभूत्वाज्ञात्वातेनपुराकृतं॥७६॥राजन्जानामिदंसर्वंयत्त्वंवदसिबुद्धिमान्॥इष्ट
रःफलतामस्तिकृतकर्मानुसारतः॥७७॥जन्मनीनस्त्वतीयेत्वंराजाभूद्गौडमंडले॥ततस्त्वयाश्रमस्तेनब्राह्मणःपाति
तःपदात्॥७८॥तस्यसर्वंत्वयानीतंदेशान्निःकासितःसच॥ततस्त्वंतेनपापेनमृतोनरकमाप्तवान्॥७९॥बहुकालं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रदुःखंभुक्त्वानिष्पापतांगतः।।पूर्वपुण्यानुसारेण जातस्त्वंब्राह्मणस्यतः।।८०।।तत्रतत्संततःकष्टंबहुदुःखपरिक्लेसरान्।।गं
१० गातटसमाश्रित्यकालिंद्यायत्रसंगमः।।८१।।ततस्तत्रैवनिधनंप्रपन्नःकालपर्ययात्।।तपसादुष्करेणैवनिर्जर्जरकलेवरः।।८२।।
तपसःप्रभवैःपुण्यैर्गतस्त्वंविष्णुसंनिधौ।।तत्रस्थितश्चसुचिरंरममाणोयदृच्छया।।८३।।ब्राह्मणाभिभवजातंतस्यपापस्यशे
षतः।।विष्णुनाप्रेषितोभोक्तुंपुण्यशेषांतपोभव।।८४।।यत्वपातात्तितोविप्रःस्वपदात्पूर्वजन्मनि।।तत्कर्मणःफलंचेतत्स
स्वयंयच्चतेगतं।।८५।।तन्नदेवानमनुजोददतेसुखदुःखयोः।।कारणंकेवलंकर्मयत्कृतंपूर्वजन्मनि।।८६।।ईशस्तदनुसा
रेणफलंयच्छतिदेहिनां।।अल्पंवायदिवानल्पंशुभंवायदिवाशुभं।।८७।।एतदाकर्ण्यवाक्यंसमहर्षेःसारवत्तरं।।राजाविज्ञा
पयामाससमुनिसर्वतांगतिं।।८८।।भगवन्कोप्युपायोस्तियेनाहंसुखमासमे।।एवंगतेमहाभागयद्यस्तितन्निगद्यतां।।८९।।
इतिविज्ञापितस्तेनमुनिर्ध्यानपरोभवत्।।प्रणिधानेनतज्ज्ञात्वानपायकथयत्ततः।।९०।।राजंस्त्वंगत्वातपतीमाषाढस्नानमा
चर।।तस्मादुपायोनास्त्यन्यःस्वपदप्राप्तयेतव।।९१।।कृतेचाषाढसवनेपरिपूर्णेकृतद्विजैः।।निश्चितंस्वपदप्राप्तिस्तव
राजन्भविष्यति।।९२।।निरूपायंपदभ्रंशोकामरूपाधिपेनते।।भगवानपिभक्तेशोपाव्यमानोपुनःपुनः।।९३।।तपसाषाढसव
नंवर्जयित्वावरंददौ।।समाधिनामयादृष्टएषोर्थःकथितस्तव।।९४।।संपादयेनंराजेंद्रयदिस्वपदमिच्छसि।।इत्युक्तस्तेनमुनि
नामार्कंडेयेनभूमिपः।।९५।।तमाप्यध्धनमस्कृत्यसगृहीताशीस्ततोव्रजी।।ययौससत्वरंतापीमाषाढस्नानहेतवे।।९६।।दृष्ट्वातापीं राम
नमस्कृत्यसंतुष्टावसवितुःसुतां।।जगतःपापकोद्यौघप्रक्षालितपदूदकान्।।९७।।द्विजैर्जुष्टान्निसततंसहस्रैर्वनवासिभिः।।तान्निपीत्वा १०
चचांभांसितद्व्याकस्यभवसुनः।।९८।।पीड्यमानान्नरान्दृष्ट्वानितांतंपापकर्मभिः।।तेषांपापविनाशायजानामित्वामिहागतः।।९९।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामधुग्गुरूपतेयत्रसापरासुरकामधुक्॥ सर्वेषांतंतुलोकानांकामधात्रीमहानदी॥३०॥ यद्वापरास्तरंगिण्योजायतेस्पर्शनात्क्षमा॥
त्वदंबुस्नानमहात्म्यंचवदस्यर्थोविशिष्यते॥३॥ यदाषाढेतवजलैः पूताकेतत्रमानवाः॥ यथाभिलषितंप्राप्तानकामंरविनंदने॥२॥ अमृत
त्वंज्वज्जकिंनयस्याषाढनिषेवणात्॥ अमरत्वंनराप्राप्य क्रीडंतित्रिदशैःसह॥३॥ इतिस्तुत्वाततोदेवींतापींदिनकरात्मजां॥ आषाढ
माससवनंराजाकर्तुंप्रचक्रमे॥४॥ ज्येष्ठस्येववदशम्यादौकृत्वाथविधिपूर्वकं॥ संपूज्यतपतींदेवींभक्त्यापरमयान्वितः॥५॥ प्रातर्म
ध्यातथासायंविदधेस्नानमादृतः॥ संचिंतयन्नविरतंसूर्यमंडलगंहरिं॥६॥ कमलासनसंस्थंचचारुहासंहिरण्मयं॥ केयूरकुंडलो
पेतंशंखचक्र धरंविभुं॥७॥ पूजयित्वाततोभक्त्याविष्णुंतद्गतमानसः॥ विष्णुपादोदकंरात्रौतुलसीदलसंयुतं॥८॥ चकारभोजन
स्थानेसंध्योपासनपूर्वकं॥ एवंतेनकृतेराज्ञाआषाढस्नवनंपरं॥९॥ आषाढीपौर्णिमायांचविधिवत्संयतात्मनः॥ ततःपुराणपुरुषःप्र
सन्नःप्राहतंनृपं॥१०॥ कृतंशतबलेस्नानंमत्स्वजनसमन्वितं॥ तुष्टोस्मिकिंफलंतेस्तुस्नानादस्मात्तदुच्यतां॥११॥ शतबलिरुवाच॥
तुष्टोसियदिदेवेशपुराणपुरुषोत्तम॥ ममस्वपदसंप्राप्तिरभवत्वत्प्रसादतः॥१२॥ पश्चाच्युतत्वसदावाप्तिरितिमेदेवदीयतां॥ इतिसं
प्रार्थितस्तेनप्रोवाचपरमेश्वरः॥१३॥ तवस्वपदसंप्राप्तिर्भविष्यतियथापुरा॥ अंतेत्वमत्सदावाप्तिर्भविताचनसंशयः॥१४॥ कृतं
त्वयायत्सवनंआषाढेतपतीजले॥ तेनपूर्वंकृतात्पापाद्विमुक्तोसित्रिभिर्दिनैः॥१५॥ शेषरहाभिर्नृपतेयच्छांदसिकरेस्तितत्॥ ताप्यामा
षाढकर्तॄणांदुर्लभंनास्तिकिंचन॥१६॥ इत्युक्त्वाभगवान्देवःकर्मणांफलदायकः॥ अंतर्दधेसविश्वात्मात्रैलोक्यव्यापकोहरिः॥१७॥
राजापिपरमानंदस्वरूपंतमवेक्ष्यच॥ रोमांचितश्चहर्षाश्रुपूर्णदृष्टिरजायत॥१८॥ अंतर्हितेभगवतितस्मिन्देवेजनार्दने॥ सोपिस्वनि
यमंपूर्णंविदधेस्तपनस्यच॥१९॥ ततश्चस्वपुरंगत्वास्वराज्यंप्राप्यपूर्ववत्॥ तथैवदुस्तरतरोरिपूणांसमपद्यत॥२०॥ तपस्याश्चप्रसादेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आषा०म० विष्णोः सालोकतां ययौ॥ विष्णोपराधनेनं सुप्राप्यते किंनदुर्लभं॥२१॥ ज्ञातापाढप्रभावस्तिसस्नोसप्रतिवत्सरं॥ आगत्याग
११ मनियमाद्विवद्धृद्धयान्वितः॥२२॥ स्नानेनसमा द्दोपरमेतत्पसामाषाढमासस्यमहाप्रभावे॥ राजाभ्ववां कांतिसमन्वितोभूत्सं
पूर्णबिंबः शारदांवसोमः॥२३॥ आषाढमासस्नपनेनसर्वैः पापैर्विमुक्तः सभ्वरांबभाषे॥ ऐंद्रागजः पल्वलकर्दमात्तः संप्रा
प्यसंगाविहृतोसुतस्याः॥२४॥ ततोमहेंद्रोन्तपतिंबभाषेत्वमेहिराज्यंत्रिदिवंव्रजामः॥ ताप्याजलैरप्यघपुंजदाहतीव्रैः प
वित्रीकृतविग्रहोसि॥२५॥ दिवंसमागत्यचभुंक्ष्वभोगांस्त्वयोत्तमैः कर्मभिरर्जितांश्च॥ धन्योराजन्नितिपञ्चयहेतोः सुराः
समस्ताः वसुधांसमेताः॥२६॥ राजामहेंद्रंतदनुप्रणम्यकृतांजलिः प्रश्रयन्चार्ववादीत्॥ अयंप्रसादोभगवंस्तपसास्त
वानुकंप्योपदहंबभूव॥२७॥ हत्वातिपीतप्रसभांबुराशिर्वागमाच्चसंस्तंभितवध्यन्तिः॥ अनुग्रहोस्तेममकुंभयोनिर्मोभ्रं
शायामासपदात्वयास्यात्॥२८॥ सर्वेसुरायेनममप्रसन्नामानेतुमुर्वीतलमागताश्च॥ धन्यीकृतोहंसहपूर्वजैस्तैः कुतोन्यथा
स्यादिपतिप्रतिष्ठा॥२९॥ इतिवचनमुदारंशक्रमुक्त्वान्पोसौतरणिकिरणवर्णंक्षिप्रमारुह्यदत्तं॥ सकलसुरविनेत्रामीति
भाजाविमानं॥ सहविबुधसमाजैः स्वर्गलोकंजगाम॥३०॥ कथितमितिकथाचेद्दत्समहात्म्यमेतद्दिनकरतनयायास्नानतोजा
यतेयत्॥ व्रजहिहिसुमासेनीरदायानहेतौविकचकुरजनीयेकेकातिरम्या॥३३॥ इतिश्रीस्कंदपुराणेरुद्रस्कंदसंवादेआषाढम
हात्म्येद्वितीयोध्यायः॥२॥ ॥ईश्वरउवाच॥ द्वावभूतांपुराविप्रौशुद्धवंशासमुद्भवौ॥ पशुक्रीतरवरक्रीतनामभ्यांविदितौ ॥राम॥
भुवि॥१॥ बालभावात्तयोः प्रीतिरवर्द्धतदिनेदिने॥ समानशीलव्यसनौस्वभावोपिसदृक्तयोः॥२॥ तयोः परस्परंप्रीत्योददतोप्रतिग्र ॥१४॥
ह्णतोः॥ भुंजानयोर्भोजयतोः सध्रीच्योः सततंतयोः॥३॥ गुह्यंकथयतोश्चापिपृच्छतोश्चपरस्परं॥ वर्द्धमानाधिकंप्रीतिर्दिवसेदिवसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवेत्॥६॥ पतितैः सह संसर्गैः स्त्रीषु लंपटयोस्तयोः॥ नास्तिकानां च संयोगाद्बभूवुः पुण्यनाशनं॥५॥ तत्संसर्गवशात्तौ तु नास्ति
कं धर्ममाश्रितौ॥ लोकद्वयं भ्रंशकरं महामोहसमुद्भवं॥६॥ एवंविधानि वाक्यानि श्रूयंते तत्र पापिनां॥ परस्त्री परवित्तेषु प्रस
क्तानां सुरासु च॥७॥ नास्ति पुण्यं च पापं च निग्रहायं निरात्मकः॥ भूतानां समवायो यं येयत्र चेन कारिणां॥८॥ नास्ति चातः परो
लोकस्तदर्थाकाः क्रियाजनाः॥ यत्र प्रत्यक्षं तदेवास्ति नास्ति तद्दृतोन्यथा॥९॥ यत्र वा घृते पीयते च सुखं यदिह भुज्यते॥ तदेव सत्यम
परं सर्वं मिथ्यावधार्यतां॥१०॥ मृतः स्मरति भुक्तं च यच्च दत्तं स्वबंधुभिः॥ पाति स्वर्गं च नरकमित्येता धूर्तकल्पना॥११॥ आश्रमा
जीवितार्थाय क्लेशास्तु परिकल्पिताः॥ आत्मस्त्री द्रव्यरक्षायै नरके भीषयंति च॥१२॥ देहाद्यदि परो ह्यात्मा छिन्ने देहे कथं न सः॥
दृश्यते क्वापि गच्छत्वात्तस्मादात्मीयं चापरः॥१३॥ नास्ति प्रमाणं प्रत्यक्षान्नापरं न च मत्सुतः॥ अन्यो मोक्षस्तत्सत्यवाक्यैर्दृष्टो लोकय
तैरपि॥१४॥ साधारणे मनुष्यत्वे केयं वर्णव्यवस्थितिः॥ किमभक्ष्यं च भक्ष्यं च न दृश्यं च रोचते॥१५॥ सर्वोपभोग्यं यद्वस्तु रम
णीयमविश्रुतं॥ रममाणस्य तस्मिन्के — — ष्यां विजानतां॥१६॥ परोपकारः कर्त्तव्य इति चेच्छास्त्रनिश्चयः॥ स्त्रीणामनुपकारः किं
रक्ष्यया क्रियते बुधैः॥१७॥ इत्यादिवाक्यैर्लोकानां मोहयंतौ भ्रमंततः॥ सत्सु विदुषामावां वेक्ष्यावावितिवादिनौ॥१८॥ रात्रौ यदृच्छ
या पीत्वा गणिकावदनासवं॥ प्रातः स्नात्वा धौतवस्त्रे परिधायाहिते सते॥१९॥ मृत्पिंडलांछिते भाले बाक्षोरसि कंटके॥ पवित्रपाणि
जपतस्तौ मिथ्यामौनधारिणौ॥२०॥ प्रतारयामासतुस्तौ दंभेनेति सदा जनान्॥ चक्रतुः सततं पापावभक्ष्याणां च भक्षणं॥२१॥ आगम्या
या गुरुर्भ्रातृपत्न्यास्तद्गमने रतौ॥ परस्त्रियोः सजोद्याः स्तुतयाः स्ताश्च स्वयोषितः॥२२॥ महाप्रतिग्रहरतौ महातीर्थेषु तेषु च॥ रजकादि
गृहे भुक्तं युक्तं ताभ्यां यदृच्छया॥२३॥ तदा कलियुगं चासीन्न तादृग्प्रसरोन्यथा॥ अन्यथा कलियुगवेत्तादृक्कावाक्योक्तमार्गप्रसरः कथं स्या
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दितिशेषः ॥ नयकोशासकोराजायत्र पापरतोजनाः ॥ २४ ॥ एकपाद्यत्रधर्मोपिनसंसयत्रदृश्यते ॥ पाखंडीप्रसरोयत्र -- कोपाःश्रु

तिक्रियाः ॥ २५ ॥ तस्मिन्युगेतदाचारौकेनापिनचदंडितौ ॥ राज्ञःपुण्यवतोभावाछस्वतोदंड्यदंडिनः ॥ २६ ॥ तत्किंचित्स्यातकंनास्तिताभ्यां
यत्रकृतंपुनः ॥ संततिर्नतयोरासीद्दारसंसर्गिणांतयोः ॥ २७ ॥ ततःकालेनकियतापश्चुक्रीतोगतोवनं ॥ हंतुंम्टगान्वागुरिकैःसार्द्धं
मांसस्यभक्षणात् ॥ २८ ॥ तत्रव्याघ्रात्सविपदंप्रापपर्वतमस्तके ॥ नाग्निक्रियासमभवन्नक्रियाचौर्ध्वदेहिकी ॥ २९ ॥ ततोसौकिंकरैर्न
तोहत्वाबध्वायमांतिकं ॥ ज्ञात्वायमेनतत्कर्मरौरवंपातितंतदा ॥ ३० ॥ यदाताम्रमयाभूमिर्वन्हितापेनतापिता ॥ वन्हिज्वालासमाकीर्णा
दृष्ट्वाप्राणापहारिणी ॥ ३१ ॥ योजनानांसहस्त्रेद्वेदीर्घासाहस्त्रमायता ॥ गर्तेतुसार्द्धपुरुषापापिनांदुःखदायिनी ॥ ३२ ॥ तत्रलोहमयैः
स्तंभैःश्रंखलैर्हस्तपादयोः ॥ बुधाक्षिप्ताबकुशो ॥ वितपन्यमकिंकरैः ॥ ३३ ॥ ततोदस्तसमस्तत्वकुलेठनासमजायत ॥ शुष्यमानास्तमां
सास्थिःसंजातबहुवेदनः ॥ ३४ ॥ उपरिस्थैःकिंकरैश्चहन्यमानःपुनःपुनः ॥ घटिकार्द्धंसुखमपितस्यजातुनचाभवत् ॥ ३५ ॥ स्मरन्घोरंनि
जंकर्मनास्तिकार्यंव्यधीयते ॥ नापश्यच्छरणंतस्यकिंचिद्दुःखस्यमोक्षणे ॥ ३६ ॥ अहर्निशंचिंतयंश्चनचोपायसपश्यति ॥ म्टशेरण
हृदुःखार्तोपासमानोनिरंतरं ॥ ३७ ॥ रजीवन्निरक्तकंतंकर्मकर्मस्वंविघतेकथं ॥ आत्मानंप्रत्युपालंभैनैवंवदतिसर्वदा ॥ ३८ ॥ एवंसनिर
येमग्नोभुंक्तेकष्टंस्वकर्मतः ॥ अपासोकरमित्रोपिस्वमित्रपक्षतांगतः ॥ ३९ ॥ श्रुत्वाव्यलपदत्सर्यंशिथिलोजीवितोभवत् ॥ कियद्दि
नानिशोचित्वापश्चात्स्वखेभिजायते ॥ ४० ॥ तथैवचनिजंकर्मपापरूपंचकारसः ॥ तत्रतत्रतदायातियत्रलोकाःकुमार्गगाः ॥ ४१ ॥ भो ॥राम॥
जनाछादनात्स्त्रीभिस्तसत्कुर्वंतिभक्तितः ॥ तदादेशाद्व्रतेसर्वेभुजतेस्त्रीपरस्परं ॥ ४२ ॥ निःशंकाश्चमिथोछिष्टंखादंतिचपिबंतिच ॥ व

र्तमानःसदृक्षंतुकदाचिद्दाव्रजत्पुरं ॥ ४३ ॥ मुदुरावर्तीनिस्तेनेनविघ्नोवित्तस्यकारणात् ॥ तस्यापिनाभवत्क्वापिदाहाद्यावैदिकीक्रिया ॥ ४४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथैव किंकरैर्बध्वा सोपिनीतोयमं तिकं॥ पश्चुक्रीतस्तु यन्नासीत्तत्रैव यमशासनात्॥ ४५॥ सोपि क्षिप्तो भृशं क्रूर किंकरैर्विलपन्मुहुः॥
हन्यमानैर्महाघोरैर्नरके मिलितो पुरः॥ ४६॥ निंदतौ स्वकृतं कर्म क्रंदतौ च पुनः पुनः॥ क्षुत्तृ[illegible]भ्यां युध्यमानौ पतितौ दुःखसा
गरे॥ ४७॥ असात्तीव स्यात् चैतन्योदह्यतौ रौरवाग्निना॥ सहाकार पदौ दीनौ ताड्यमानौ प्रतिक्षणे॥ ४८॥ सत्यक्षमानौ दुर्वाक्यैः कंपमा
नौ भयातुरौ॥ नरकांतमपश्यंतौ वर्षाणामपि कोटिभिः॥ ४९॥ मर्त्यलोके सुखमभूत्पापकर्म प्रकुर्वतां॥ न हि पाको महादुःखकार
को नरको भवत्॥ ५०॥ स्यादत्र पापिनां सौख्यं पापं कर्म प्रकुर्वतां॥ तेषां तु निरयेकष्टः परिपाको दुरत्ययः॥ ५१॥ पुण्यकर्मकृतां
लोके कष्टं स्याच्च पदे पदे॥ असंतसुखसंप्राप्तिः स्वर्गलोके तु जायते॥ ५२॥ पापकर्मकृतां तेषां तत्क्षणं ह्युपपद्यते॥ फल
पाके महादुःखं यत्र कल्पायुते क्षणः॥ ५३॥ अर्थो हि नश्वरो लोके सुखं क्षणिकमेव च॥ जीवितं चंचलतरं सर्वं जानाति मान
वाः॥ ५४॥ कामादिकैस्तथाव्येते जानंतोपि बलाद्दिह॥ कार्यं कर्म किमपि दुस्तरं यद्घोरमपि॥ ५५॥ [illegible] क्रीतस्य भार्या तु स
कांता स्वपितुर्गृहे॥ सत्संगति वशात्सा च न पापां तिकमभ्यगात्॥ ५६॥ तस्याः स्वजनको विप्रः पुण्यकर्म परायणः॥ श्रुतिस्मृ
ति पुराणार्थं पापादूरे पथि स्थितः॥ ५७॥ तद्गृहे सा स्थिता साध्वी सर्वथा विजितेंद्रिया॥ भवांतर कृतं कर्म निंदती स्वपतिं न च॥ ५८॥
ततः स्वपतिं श्रुत्वा मृत्युमवस्थामुपागतं॥ विकेशा व्रतिनी भूत्वा तपस्तेपे सुदुष्करं॥ ५९॥ परिधत्ते न वसनं रक्तं च व्रतधारि
णी॥ स्निग्धस्नानं न कुरुते भूशय्यापत्रभोजना॥ ६०॥ मासोपवासान्कुरुते कृच्छ्राणि विविधानि च॥ एवं कालं नयंती तत्त
पैश्च विविधैरपि॥ ६१॥ सा यद्भर्तारमुद्दिश्य ददाति अन्नं च वारि तु॥ नोपतिष्ठति तत्तस्य अंतरिक्षे विनश्यति॥ ६२॥ पिंडप्रदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दा॥नादिभिर्यथा॥श्रद्धासमन्वितं॥यत्किंचिद्दीयतेतच्च पापिनान्नोपतिष्ठति॥६३॥कदाचिदथसादृष्ट्वासार्धंरविसुतांप्र

ति॥गच्छंतीमतिवेगेनशुचिस्नानायभक्तितः॥६४॥तेनसार्धेनसासार्द्धंसंश्रुत्यस्नानजंफलं॥जगामसत्वराहृष्टातापींप्र
तिमहानदीं॥६५॥तत्रसाप्रातिनीस्नात्वा चाषाढेतपतीजले॥मासंयावन्निराहाराचैकाग्रस्थितमानसा॥६६॥स्नानंसमा
प्य साविप्रान्भोजयित्वातपस्विनी॥अन्येद्युरापेविप्रान्सानिमंत्र्यचतदायतः॥६७॥श्राद्धं[illegible]कृत्वाकृताषाढे फलंपत्यददाव्यथा॥
पश्चात्तान्भोजयामास मिष्टान्नैःश्रद्धयान्विता॥६८॥वसुरुद्रादिससुताः पितरश्राद्धदेवताः॥तेगत्वाकथयामासुस्तत्पुण्य
मंतकायचा॥६९॥तथाषाढेचयत्स्नात्वास्वभर्त्रे श्रद्धयान्विदौ॥यमस्तच्चित्रगुप्तायाविचार्यतमहाफलं॥७०॥स्वकंपुरुष
माकार्यस्ववाचंविनयान्वितं॥आदिदेशातिवेगेनयात्वाकृष्यचरौरवात्॥७१॥नीयतांसविमानेनप्रभुक्तौतत्रिविष्टपं॥नि
ष्कल्मषोयंसपत्न्याः शुचिस्नानस्यपुण्यभाक्॥७२॥स्नात्वातपत्यामेतस्यपत्न्यादत्तंफलंमहत्॥तस्माज्जाताश्वसंस्वर्गेभुंक्ता
भोगान्मनोरमान्॥७३॥कल्पेनापिनचैकेनतस्यपुण्यस्यसंक्षयः॥अन्यानिसर्वपुण्यानिक्षीयंतेकिलभोगतः॥७४॥अत्रयत्
क्रियतेपुण्यमाषाढेतपतीजले॥तस्यपुण्यस्यनांतोस्तिभोगात्कल्पशतैरपि॥७५॥ततोसौधर्मराजस्यवाक्येनत्वरयान्वितः॥
यात्वाचतंसमुद्धृत्यरौरवाद्दारुणात्॥७६॥विमानवरमारोप्यजातदिव्यशरीरकं॥दिव्यांगराजवस्त्रंचदिव्यचंदनचर्चितं॥७७॥
दिव्यवस्त्रपरीधानंदिव्यमाल्योपशोभितं॥शासनाद्धर्मराजस्यनिनायत्रिदिवंप्रति॥७८॥हर्षितश्चप्रभुक्तौतोविस्मयोत्फुल्ललोच ॥रामः॥
नः॥एवत्ससमचाभालिःस्वप्नाकिंवामतेदृशः॥७९॥किमेतन्ममपापस्यस्वर्गप्राप्तिःकथंभवेत्॥नास्तिमेसुकृतंकिंचित्संदेवंपापकारि ॥१३॥
णः॥८०॥सर्वथानैवपश्यामिस्वस्वर्गप्राप्तिकारणं॥कोयंवापुरुषोयेनरौरवादहमुद्धृतः॥८१॥क्षणंमुखंमेसंजातमेतच्चकिंप्रभभाकृजं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंवितर्क्यबहुधापुरुषंतमभाषत॥८२॥कस्त्वंकस्मादागतोसिकेनवाप्रेषितःशुभः॥केनाहंमोचितोस्म्यस्माद्रौरवाद्दारु
णं॥८३॥मयापुण्यस्यलेशोपिनकृतःपापबुद्धिना॥यत्नेनपातकमहोमयाप्रतिदिनंकृतं॥८४॥कस्मान्मेस्वर्गसंप्राप्ति
रेषमेसंशयोमहान्॥किंवदाम्यथचत्वेकौमप्यतर्को्ऽथबांधवः॥८५॥येनाहंदारुणादस्माद्रौरवाच्चसमुध्दृतः॥येन्नकु
र्यास्पिताभ्रातानपुत्रोनचबांधवः॥८६॥कृपालुरपिनत्वन्यस्त्वयाहेलनयाकृतं॥दत्तास्यमश्नपणायत्तेतन्नास्तिभुवन
त्रये॥८७॥इत्युक्तेतेनसतदादेवदत्तउवाचतं॥किंकरिष्यसिप्रश्नेनस्वर्गमेहिमयासह॥८८॥भुंक्ष्वात्रविपुलाभोगान्मा
नवैरतिदुर्लभान्॥असंतपुण्यजनितान्कालावधिविवर्जितान्॥८९॥अथवाश्रवणेछातेतच्छृणुष्ववदामिते॥यमस्यपुरु
षंसांत्वंतन्महाब्धसमागतं॥९०॥तेनचप्रेषितंविद्धितद्वादासिमोचितः॥स्वर्गंचनियसेतद्ददितितेकथितंमया॥९१॥इति
दूतवचश्रुत्वापश्रुक्रीतःपुनस्तदा॥उवाचपुनरप्याप्तमन्ममतद्धितकारकं॥९२॥मममित्रंवरक्रीतोपासमानोस्तिरौरवे॥मयाते
नचसंभूयःपातकंबहुशःकृतं॥९३॥कुमत्युरपितुल्योभून्नतुदाहादिकाःक्रियाः॥तस्याप्यासीद्रौरवश्चद्वयोरप्यभवत्समः॥९४॥
सत्कःकथंसतत्रैवकस्मादहंचमोचितः॥एतन्मेकारणंदेवदूतवदयथातथा॥९५॥दूतउवाच॥स्वर्गस्यकारणंश्रोतुमिछातेतन्नि
शामय॥यावत्त्वयोस्त्वजोभार्याश्रोत्रियाणांकुलोद्भवा॥९६॥आषाढस्नपनंकृत्यतपसांपापनाशनं॥तस्यपुण्यंतयादत्तंतुभ्यंब्रा
ह्मणसंनिधौ॥९७॥तत्पुण्यंमहदज्ञात्वाधर्मराजेनतत्क्षणात्॥मोचितोनरकाद्घोरात्कल्पभोगात्सुदुःखदात्॥९८॥आषाढपुण्यदा
नेनमोचितस्त्वंस्वभार्यया॥वरक्रीतोमोचकस्तुइहकोपिनविद्यते॥९९॥तस्माद्वर्षसहस्राणिपतिसौतोहिरारवे॥पीड्यमानोनिजंकर्मभु
क्तायद्विहितंपुरा॥१००॥आषाढस्नपनस्यत्वंफलेसुविपुलंदिवि॥निसंरमस्वभुंजानोयावत्कल्पव्यवास्थिति॥१॥इतितद्वचसंप्रीतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आषा०म० पशुक्रीतोभ्यधात्पुनः॥ यमस्यानुचरोभूत्वादयाविस्त्वंविलोकयसे॥२॥ तत्वाकिंदहंयाचेनान्यथापुरुषेयदि॥ यदाषाढस्यमेपु
॥१४॥ ण्यमस्तिदत्तंतुभार्यया॥३॥ अहंयस्याःप्रभावेननिर्गतोरौरवात्क्षणात्॥ तदर्द्धंपुण्यदत्वायंखरक्रीतोपियोच्यतां॥४॥ नरकेद्दा
रुणेस्मिकाकथमेनंव्रजाम्यहं॥ भ्रातुरप्यधिकंह्यस्माद्भुवतेसहचारिणा॥५॥ यद्यनेनसमंस्वर्गंयाम्यहंत्वत्प्रसादतः॥ एतद्यांचे
जलिंबध्वानान्यथाकर्तुमर्हसि॥६॥ उत्तमेषुफलंयोवैकस्यापिहिनजायते॥ इतिश्रुत्वादेवदूतःपुनस्तेमित्यभाषत॥७॥
ननिष्यसियदिस्वर्गंस्वमित्रप्रतिदीयतां॥ स्ववनार्द्धफलंतस्मैनिरयाद्येननिःसरेत्॥८॥ ततोसौहृष्टमनसाददौपुण्यार्द्धमाहृ
तः॥ दत्तपुण्यंदेवदूतःस्थापयित्वातुतंपथि॥९॥ व्याघ्रसतुंगृहीत्वातुतत्समीपमुपाययौ॥ खरक्रीतेनसंयुज्यपशुक्रीतेनु
तस्मैस्व हर्षितः॥१०॥ तस्यपत्न्यायथादत्तंपुण्यमाषाढसंभवं॥ तद्विभज्ययथादत्तंतेनैपुण्यत्तः॥११॥ खरक्रीतोतथाहृष्टःपशुक्रीतस्य
तांस्त्रियं॥ तुष्टावपरमप्रीत्याहर्षयुक्तेनचेतसा॥१२॥ अहोधन्याःस्त्रियस्ताश्चतारयंतिनिजंपतिं॥ याःकष्टेभ्योसमस्तेभ्योवि
हीनेभ्योविमोहितः॥१३॥ यदापितासंसजतियदामाताचबांधवः॥ तदापिनैवसजतिसाध्वीस्त्रीस्वपतिंपुनः॥१४॥ विवर्त्ते
तेश्मशानाच्चमाताभ्रातापितास्वसा॥ मित्राणिबांधवाश्चैवसाध्वीस्त्रीननिवर्त्तते॥१५॥ प्रियंकुर्वंतिसततंस्वभर्त्तुःकुलजा
स्त्रियः॥ कायेनमनसावाचाप्राणैरपिविशेषतः॥१६॥ मताभर्त्रास्वयंसाध्वीनमतावाकथंचन॥ माचाधरतिभर्त्तारंतंकि
मस्तितेनोधिकं॥१७॥ यादृष्ट्वाप्यधनाःस्पृष्टाभर्त्तुःसौख्यायजायते॥ मंत्रीवमंत्रंदत्वातिदासीवानाधयत्यपि॥१८॥ तस्यावधामि
क्रियतोगुणान्सर्वगुणाधिकान्॥ सुखहेतुस्त्रिवर्गस्ययाप्रकृष्टंहिकारणं॥१९॥ तेधन्यामानवालोकेयेषांभार्यापतिव्रता॥ अपि ॥राभ्रा।
पातककर्माणःकिंपुनश्रेयसिस्थिताः॥२०॥ साध्वीभार्यासमंनास्तिहितंलोकेषुकांचन॥ यस्याःप्रभावाःप्राप्यंतेसौख्यानीहपरत्र ॥१४॥
च॥२१॥ ससंतयापिध्यतोसिभार्ययासहितोमया॥ अपिलक्षेश्चवर्षाणिनान्यथोद्धरणंभवेत्॥२२॥ इहसर्वेषुकार्येषुस्त्रीभ्योन्यत्सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनंन हि॥ कार्यैकार्येह्यनीशासन्न शौर्ड्ढैन स्त्रियापहेतु॥ २३॥ इतिस्तुतातततोमित्रंपशुक्रीतमुवाचह॥ पातकयपित्वहंधन्योयस्यमीत्व
द्विधःसखा॥ २४॥ येनोध्दतोहंनरकान्नितांतंदारुणादपि॥ नकरोतिचय द्भ्रातानपुत्रोनचबांधवाः॥ २५॥ यदृच्छयाविष्टमनासायत्व
याहेलनंकृतं॥ अन्येपुमांसासुलभाःसदाराश्चातिदुर्लभाः॥ २६॥ यद्यच्चरिष्यर्थास्त्वंहिनरकाद्दतिदुःखदात्॥ कल्पांतंपतितोयावद्द
वस्त्वंह्यनपस्यकाः॥ २७॥ सस्तनुःपापकर्मापिपासमानोनशोचति॥ कल्पेवाप्यद्यवापुत्रोमोचयिष्यतिमांध्रुवं॥ २८॥ नकश्चित्सिंडद्दो
यस्यमहापातककर्मणः॥ निर्गमोतिनिराशस्यतद्दुःखंवेत्तिनापरः॥ २९॥ भ्रात्रावासूनुनावाकिं कार्यंत्वनुपकारिणा॥ परोपाहितकर्त्ता
यःसबंधुरितिनिश्चयं॥ ३०॥ अहंतुरौरवेमग्नो निराशाश्चानिजोद्धृतो॥ उद्धृषेसत्वयोदाशनिजपुण्यार्द्धदानतः॥ ३१॥ दातुर्नैवास्य
पुण्यार्द्धमुत्सहेतनरोपरः॥ त्वदंतेपुरुषव्याघ्रपरदुःखेनदुःखितः॥ ३२॥ इत्थु क्तातंनिजंमित्रंदेवदूतस्यसंनिधौ॥ देवंप्रातितताेयात
स्ताभ्यांसहमु [illegible] दान्वितः॥ ३३॥ देवदूतंपुरस्कृत्यस्वर्गमार्गस्यदेशकं॥ गच्छतौतौपरंहृष्टाविसूचतुःपरस्परं॥ ३४॥ दिष्ट्यारौरवमासा
द्यतस्मात्कष्टाद्विनिर्गतौ॥ दिष्ट्याप्राप्तंशुचिस्थानंपुण्यंदत्त्वंतयामहत्॥ ३५॥ जन्ममानुष्यकंलब्ध्वायेनवांछितमाप्यते॥ व्यर्थीकृतंतद्दा
वाभ्यांनास्तिकत्वेनवर्त्तनात्॥ ३६॥ आःकोपिवेदमार्गतंकल्पवृक्षंपरित्यजेत्॥ तदन्यधर्मचरणादृकेशिपरिसेवया॥ ३७॥ अहोमहोमनुष्या
णांश्रुतिधर्मपरायणं॥ परित्यज्यचनास्तिक्यंमगात्स्माजलार्थिना॥ ३८॥ आवाभ्यांयानिपापानिकृतानिसुमहांत्यपि॥ कल्पांतेनापितैः
प्राप्तोनरकोनैवतीर्यते॥ ३९॥ आःकोयंचमनुष्याणांअविचारोमहानसौ॥ यत्क्षणार्द्धसुखस्यार्थंसह्यतेनरकश्चिरं॥ ४०॥ धिङ्नास्तिकादु
राचारासुहृत्तोहाजितोजनान्॥ संत्याज्यपुरुषःश्रेष्ठोयैःपापंक्रियतेनरः॥ ४१॥ भयरौद्रमानिवैःपापैर्यद्यातद्याप्रकल्पते॥ क्रियतेवातच्छंयंनः
पापंकष्टतरंत्विह॥ ४२॥ अतिगुह्मंचभिःपापंपापिभिर्यद्विधीयते॥ तदेवतद्यमोवेत्तिद्र[illegible]ष्टायःपुण्यपापयोः॥ ४३॥ पापपुण्यमकुर्वंतोवेदवा
ह्याक्रियापराः॥ यमेनपरिपीड्यंतेदारुणंनिरयंगताः॥ ४४॥ वैदिकोयद्दचारोसतूनंसर्वकामदः॥ पूर्वैःपूर्वतरैर्जुष्टसकथंत्यजतेबुधैः॥ ४५॥ येपुण्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आषा०म० कर्मकुर्वंतिवेदोक्तनियमादृतः॥लोकद्वयेतेपूज्यंतेलभंतेवांछितंसुखं॥४६॥वेदोक्तकर्मकर्त्तव्यंपूज्योविष्णुःसनातनः॥सक्त्वाचवि
॥१५॥ षयासक्तिर्जेयत्कामादिकांन्‌रिपून्‌॥४७॥एषएवपरोधर्मोएतदाश्रयणंनृणां॥इहलोकेपरस्मिन्वाबाधापिनहिबध्यते॥४८॥देहे
संबधिनःसर्वेभ्रातृपुत्रपदास्त्विह॥तस्मिन्‌गतेयकस्यैतेसंतुसंबंधभाजिनः॥४९॥पुत्रोदयःप्रियासर्वेह्यात्मकामायकेवलं॥आत्म
कामोनयत्रास्तिप्रेमतत्रनविद्यते॥५०॥कस्यार्थेक्रियतेपापंयेनात्माबाध्यतेदृढं॥नरकेपच्यतेवैयोयावदाभूतसंप्लवं॥५१॥भारतंवर्ष
मासाद्यहित्वासुकृतिकर्मयः॥कुरुतेपातकंकर्मनिजकुक्षैकेवलं॥५२॥यद्दाधिगतेभूमिंचयत्रैवोपार्ज्यतेद्वयं॥पापंपुण्यंचनान्य
त्रतत्रकिंप्राप्यमर्ज्यते॥५३॥रोहणंसमुपागम्यरत्नराशिसमृत्युकं॥यःकाचपाषाणशकलानादत्तेसविमूढधीः॥५४॥अहोमेहोमनु
ष्याणांकोपिसंसारवर्तिनां॥येनाम्रंतंपरित्यज्यभुंजतेविषमादरात्‌॥५५॥अन्येकिमर्थंगर्हंतेकुर्वाणाःकर्मपातकं॥आवाभ्यांतत्कृतं
कर्मयेनाद्यनिरयंगतौ॥५६॥स्त्रीणांगतेमहद्दुःखंमहद्दुःखंचजन्मनि॥बाल्यतारुण्यवृद्धत्वेषुविदुःखंतथैवतत्‌॥५७॥तत्ररागान्ध
कुरुतेपातकंयदिमानवः॥कल्पंयावत्ततोदुःखंतत्कुतोजन्मिनांसुखं॥५८॥मसोभर्ययंमत्सुलोकेस्वर्गोपिपतनाद्भयं॥तस्माद्देवंपरित्य
ज्यमुक्तिंवांछतिसूरयः॥५९॥भक्तिसिता वितरेतरंवचोनिगदंतौसहतेनजग्मुः॥सुरसद्मपतगजाश्वजलखपनापाहितंभोगमुक्तये॥६०॥
पसोस्वर्गयातमात्रे॥यतस्याभार्यास्वप्नेकेचिद्देसेवमाकुः॥भद्रेभर्त्तारौरवेपच्यमानोलब्धापुण्यंस्नानजंनिर्गतस्त्वां॥६१॥नाप्याषाढ
स्नानपुण्येनतुल्यंनास्तीहान्यद्धेनैकस्यांतभाग्यां॥हित्वासद्योदारुणोरौरवांतंप्राप्तोस्वर्गंवसतिमित्रयुक्तः॥६२॥सक्तयानिजपतिय
थात्वयासाध्विसाधुनरकात्समुध्दृतः॥ईदृशीभवतिकापिगेहिनीचेद्भवसबकुलाक्कचित्कचित्‌॥६३॥इत्यथश्रुतवतिविनिद्रितापरस्य ॥राम॥
तिस्मपुरतोनकिंचन॥स्वप्नकारणमपृच्छदाकुताब्राह्मणानतिविशारदान्मगे॥६४॥सत्यमेवमवबुध्यतंतेतोदृष्टसूर्यतनयाप्रभावया॥ ॥१४॥
स्नायतेस्मसततंतयाश्रुत्वैवसरान्दशचसस्यचादरात्‌॥६५॥मासलंघनविधेश्वदाननःस्नानतोपिकृतपुण्यसंचया॥जीवितंसमगमत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्मिनीभर्तृलोकमयसत्त्वंययो ॥६६॥ आसाद्यस्वपतिनयज्ञूरिपुण्यप्रभावात्स्वर्गाल्लोकादपगतभयंवैष्णवंधामयत्र ॥ तत्राकल्पंस्वपति
सहितास्वार्जितानक्षयात्सा भोगान्भुंक्तेस्म भुवनपतिना प्रीतिदत्तानभुंक्तं ॥६७॥ इतिदुरितविनाशिस्नानमहात्म्यमुक्तं दिनमणितनयायांमा
सि-चाषाढसंज्ञे ॥ अवहितकृतबुद्धिर्मानवोयःशृणोति प्रतिदिनमथसोपिस्नानषष्ठांशभाक्स्यात् ॥६८॥ इतिश्रीस्कंदपुराणे आषा
ढमहात्म्येईश्वरस्कंदसंवादे तृतीयोध्यायः ॥३॥ ॥ईश्वरउवाच ॥ अथासीद्ब्राह्मणः कोपिनाम्नालांगलवर्द्धनः ॥ धनवांश्चाद्विदेशी
यः कृष्यजीवीनिरंतरं ॥१॥ सच दैवेहृतधनः पुत्रैर्निष्कासितोगृहात् ॥ भैक्ष्यवृत्तस्ततोजातो ब्राह्मणोदुःखपीडितः ॥२॥ सगत्वातपतीती
रं तत्रकृतमठंशुभं ॥ उवासतत्र भैक्ष्यंसअमान्येन करोतिसः ॥३॥ कणानादाय भैक्ष्यस्य स्नानंकृत्वापचत्यसौ ॥ दैवतापितृभूतेभ्योदत्वा
भुंक्तेचानिशंशः ॥४॥ एवंस्थितेनचाषाढातेनस्नातास्तुविंशतिः ॥ एकदातस्यविप्रस्यस्नानार्थंकोपिपांडवः ॥५॥ तस्यपद्यामुत्तरितः
तीर्थेषुस्नानमाचरेत् ॥ तत्तिलाननुज्ञाप्याग्रहीलांगलवर्द्धनः ॥६॥ तर्पणार्थंनलोभेनतांश्चप्रस्थतिमात्रकान् ॥ तीर्थेतिलापहरणात्सा
तकंयतजा॰यत ॥७॥ तत्पातकं वज्रलेपोनकेनापि विनश्यते ॥ ततः सनिर्ययौविप्रः कुर्वंस्तापत्याः प्रदक्षिणां ॥८॥ ततःकालेनमहतामृतो
लांगलवर्द्धनः ॥ तापीतटेगृहीत्वातु यमदूतैर्यमांतिकं ॥९॥ नीयतेस्मततोधर्मराजःपप्रच्छलेखकान् ॥ किंयच्चपुण्यमस्यास्ति किंयदस्यास्ति
पातकं ॥१०॥ विलोक्यकथ्यतांसर्वमेतन्ममत्वरान्वितः ॥ धर्मराजवचश्रुत्वाप्रत्यभाषतलेखकाः ॥११॥ अनेनप्रथमंपापंयत्कृतंकृषिकर्मणा ॥
तत्सर्वंविलयंयातं तापीस्नानप्रभावतः ॥१२॥ यच्चतापीतटेतेनपातकंतिलचौर्यतः ॥ क्रियतेस्मतदेवास्ति नान्यत्किंचिन्नविद्यते ॥१३॥ त
स्या चौर्यपापमेवास्तियन्नलोभाद्व्यधीयते ॥ ततोविप्रस्यतैः सार्द्धं धर्मराजोथबुद्धिमान् ॥१४॥ तत्पापस्यविशुध्यर्थंनरकंवेक्षणात्ततः ॥ तस्य
चाज्ञापयामासदेवदूतंदिदेशच ॥१५॥ ततोसौदेवदूतेनमहात्मन्नरकेक्षणे ॥ ततश्चभ्रामितः सर्वान्नरकानतिदारुणात् ॥१६॥ हन्यंतेयत्रतेजी
वापातैर्बहुविधैरपि ॥ निंदंतस्वकृतंकर्मक्रंदंतश्चपुनःपुनः ॥१७॥ तानांस्तथाविधान्दृष्ट्वा मार्यमाणान्मुहुर्मुहुः ॥ यमदूतमथोवाचकृपयाप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 स्यान्वितः॥१८॥कानि कानि च पापानि कृतान्यैते महीतले॥यएवंविविधैर्घातैर्हन्यंते च पुनः पुनः॥१९॥एतेषां तानि पापानि
॥१६॥ ब्रूहि मे यमसेवक॥एतत्तस्य वचः श्रुत्वाब भाषयमकिंकरः॥२०॥येर्मातृपित्रयोर्भेदः कृतोवापितृपुत्रयोः॥दंपत्योर्मित्रयो
र्वापितथान्येषांभुविस्थितः॥२१॥दूतैर्यमस्यपीड्यंते काष्टाभ्यांपार्श्वयोर्द्वयोः॥क्रकचैः पीड्यमानास्ते द्रयंते च सुदारुणं॥२२॥
आकृष्टायैः पिता माता गुरवो ब्राह्मणास्तथा॥असंख्याताः कृतादोषाः साधूनां संयतात्मनां॥२३॥श्रुतोदरात छु तिहि हन्यंते
लो[illegible]ह शंकुतः॥कराभ्यां यैः परद्रव्यं हृतं स्पष्टाः परस्त्रियः॥२४॥छिन्नाजाताः पु[illegible]नाश्छिन्नाः क्रियंते तत्कराङ्गनैः॥कामातुरे
र्मर्त्यलोके यैरास्पृष्टाः परस्त्रियः॥२५॥आलिंगयंति तान्दूता लोहभूमिस्त्रिखिद्रुमा॥निष्टीवनं कृतैर्यस्तु देवतायतने जले॥२६॥
उल्मुकानि मुखे तेषां क्षिपंत्येते पुनः पुनः॥येनापि पितरोद्दृष्टो ब्राह्मणाधेनवश्च ये॥२७॥पादप्रहाराभिहता छिद्यंते लंतदंघ्रयः॥ब्राह्म
णानां गुरूणांच गवां क्रोधवशानुगैः॥२८॥प्रहतांतेमुद्गरैश्च हन्यंते मस्तके सकृत्॥अभोज्यानां गृहे भुक्तं ब्राह्मणैर्यस्तु लोभतः॥२९॥
तेषां मुखेषु क्षिप्यंते ज्वालांतालोहगोलकाः॥कृतं पापमयेतस्य यैरभक्ष्यस्य च भक्षणं॥३०॥वर्मं यांत्राणि वहन्मेत्तएते भृशपीडि
ताः॥पुनः पुनश्च हन्यंते शायंते च पुनः पुनः॥३१॥ब्राह्मणानां निहंतारो वदतां कृपणागिरः॥सुवर्णस्तेयिनामेषां किंकरैरतिघातकैः॥३
उत्तमांगानि चूर्ण्यंते जायंते भयएवच॥ब्राह्मणैर्यैः सुरापीता कामतो ह्यवशंकितैः॥३३॥ज्वलतां म्ररसंतेत्र पाय्यते यमकिंकरैः॥
प्रसभं पातयित्वाथ लोहैः संदंशकैर्मुखं॥३४॥विपाद्य निगडैर्बध्वा हस्तयोः पादयोर्भृशं॥गुरुस्त्रीणां तु भो[illegible]क्तातल्लिंगं छित्वा समुष्क ॥रा॥
कं॥३५॥लिंगश्रोतासि हन्यंते प्रज्वललोहशंकवः॥महापातकिभिः सार्द्धं नराः संसर्गकारिणः॥३६॥क्षिपंति क्षारकुंडेषु कृत्वासर्ग ॥१६॥
विवक्षतान्॥गवां च वधकर्त्तारः संप्रेष्यंति शिलातलं॥३७॥स्फुटिताखिवसामांसाः कंदंतश्च दिवानिशं॥स्त्रीघातकानां मध्यानि पाठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पित्वाथकिंकरैः॥३९॥पाषाणेश्चप्रपूर्यंतेज्वलद्भिरतिदुस्सहैः॥तेकथाहेतुपच्यंतेबालघातकृतस्तुयैः॥३९॥तच्छ्यथयाश्चि
यंतेचजीव्यंतेचपुनस्तथा॥शूलप्रोताश्चतिष्ठंतिभ्रूणघ्नायेनराधमाः॥४०॥लोहतुंडैस्तुधमानावायसैरतिदारुणैः॥मार्यं
तेथचजीव्यंतेजीवानांकाघातकामुहुः॥४१॥लोहदंतैश्चभिश्चोग्यैर्भुंक्तमांसास्थिमेदसः॥जघ्नुःकेवलमात्मार्थंयेपशूंनिर्दया
नराः॥४२॥जीवतामेवमांसानितेषांखादंतिराक्षसाः॥येविप्रनार्यग्रत्कंतिपरद्रव्यंनराधमाः॥४३॥आकार्यंतांभोजनार्थंमु
खेवन्हिक्षिपंतिचेत्॥जिह्वातालुगलेदग्ध्वावेदनाभ्रमरांमूर्छिताः॥४४॥पातिताश्चार्द्धदह्यंतेवेष्टमानाअनेकधा॥छलेनपर
वित्तानियैर्हृतानिचलोभतः॥४५॥तएतेकृतहन्मासाश्चेष्टतापतिताभुवि॥फलितानांपुष्पितानांछेत्तारोयेचशाखिनां॥४६॥क्रियंतेखं
डशस्तत्रनिःकृपैर्यमकिंकरैः॥यैःपरेषांगृहेवन्हिःप्रक्षिप्तःक्रोधलोभतः॥४७॥नखप्रभृतिदह्यंतेमंदंमंदंविरागिणः॥गरदानिमुखे
लोहकैरौवोवन्हिंवत्कृताः॥४८॥मार्यंतेपशुवत्तेषांनिर्घृणैर्यमकिंकरैः॥एतेचान्नापहर्त्तारोबद्धास्तिष्ठंतिनिस्त्रपाः॥४९॥तीव्रयाक्षु
धयाविष्टाविलपंतपुनस्तरां॥तैलेक्षुरसहर्त्तृणांयंत्रेनिःपीड्याकिंकरैः॥५०॥पातयंतिगतिंमांसांकंदतीनितरांमुहुः॥धातूनामपहर्त्तृणां
यंत्रमारोप्यपीडितान्॥५१॥आकर्षतितरांधातून्दारुणायमकिंकराः॥स्त्रियोपिदुष्टपापेननरकेपुदुरसयां॥५२॥सहंतेयातनांयामीं
तादृशामपिदारुणां॥अपिस्वल्पकृतंपापंभुज्यमानंसुदारुणं॥५३॥इहपश्यनरादारान्पाह्यमानान्मुहुर्मुहुः॥सुकरंपानकंकर्मक्लीबा
नामपिकुर्वतां॥५४॥शक्तैरपिसुदुर्भोग्यंभुंजानैनिरयस्थितैः॥तस्मान्नपातकंकर्मकर्त्तव्यंसुहितेप्सितैः॥५५॥मत्सुदुरैतुनरकैस्तस्मा
दीतिसमीपतः॥इतितेकथितंसर्वमनीषामार्त्तिकारणं॥५६॥नरकादरिताःसर्वेधर्मराजस्यशासनात्॥व्रजामोधर्मराजस्यसकाशंतस्य
त्वया॥५७॥इत्युक्तःसनतोयातोधर्मराजनिवेशनं॥देवदूतेनसार्द्धंसआगच्छन्नथवीक्षितः॥५८॥धर्मराजेनतेजस्वीदीप्यमानोयथारविः॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धायद्विजंतंतुबहुमानपुरःसरं॥५९॥तत्रोपवेशयामासधर्मराजोनिजासने॥तपसाषाढजनितंतस्यपुण्यमनंतकं॥६०॥ज्ञात्वा विमानमा
नीयप्राहलांगलवर्द्धनं॥त्वयार्जितो विष्णुलोकः कालसंख्यानविद्यते॥६१॥तत्रलोकेस्थितेवासः पार्श्वेभगवतोक्षयः॥कृतंचपातकंस्वल्पंइहा
नीतोसिसत्कृते॥६२॥दर्शितानरकास्तस्मात्तेनतद्विलयंगतं॥प्रथमंभुज्यतेतत्रयदल्पंपुण्यपापयोः॥६३॥तत्त्वयास्वल्पकंपापंभुक्तंदुर्गतिद
र्शनात्॥अतःशुद्धशरीरस्त्वंविमानंवरमारुह॥६४॥यातोवैकुंठभवनंभोगान्भुंक्ष्वयथेप्सितान्॥अर्जितंयत्त्वयामर्त्येविशांसाषाढसंभवं॥६५॥
तदनंतंफलंपुण्यंक्षीयंतनकदाचन॥धर्मराजवचःश्रुत्वभाषेब्राह्मणस्तदा॥६६॥यद्यनंतंममास्त्यत्रपुण्यंभास्करनंदन॥तेनपुण्येनस
र्वेतोनिर्गच्छंतुसुदुर्गतेः॥६७॥एतद्याचेधर्मराजकृपांकुरुममोपरि॥ममसर्वेनपुण्येनाविंशासाषाढजेनतु॥६८॥येदृष्टादुर्गतिप्राप्ता
मयातान्मोचय॥तंप्रत्युवाचरविजः किंतेपापैःकरिष्यसि॥६९॥निजंत्वंभुंक्ष्वसुकृतंतेचिरंसंतुनारकाः॥स्वकृतंभुज्यतेकर्मपापंवा
यदिवाशुभं॥७०॥इहलोकेपरस्मिन्वानान्योभोक्तास्तिकश्चन॥इतिमत्वाव्रजक्षिप्रंविलंबेनात्रमत्रते॥७१॥ततोसावंजलिंबध्वाधर्मराज
मथाब्रवीत्॥कथंगच्छामिदेवेशामुक्तातानतिपीडितान्॥७२॥यदिपुण्यंममास्तितद्दीयतांद्यविचारतः॥एतानापद्गतान्दृष्ट्वाकिंपुण्येनविमो
चय॥७३॥क्षणंवाथक्षणार्द्धंवाममपुण्यानुसारतः॥भवंतुसुखिनःसर्वेजंतवोनरकाअमी॥७४॥एवंप्रसादंकुरुमेकृपांकृत्वाममो
परि॥एतावतामयाप्राप्तंसर्वंहिवांछितंफलं॥७५॥विष्णुलोकेपिमेहर्षईदृशोनभविष्यति॥यादृगेतान्समालोक्यनरकेभ्योविनिर्गतान्॥७६॥
तस्मादिदंप्रसादंमेकर्तुमर्हसिसूर्यज॥नरकेभ्योविमुच्येतान्दारुणेभ्योपिडितान्॥७७॥त्वास्यामिगतपुण्योहंनरकेषुयथाक्रमं॥तेनपुण्य ॥रा॰
प्रभावेनसात्विकत्वमुपेयुषा॥७८॥इतिश्रुत्वाथतेनोक्तंधर्मराजोब्रवीदिदं॥अहोमहासाहसंकिंकरोषित्वंविचार्य॥७९॥नरकार्त्तिंक्षणमपि
परार्थेत्रसहेतकः॥अमृतंहस्तसंप्राप्तंदत्वातेभ्यःप्रसादतः॥८०॥प्रयत्नतःसमानीयविषंकोत्रजिघित्सति॥अविचार्यनकर्त्तव्यंकार्यंकिमपि ॥१६॥
पंडितैः॥८१॥नरोविमृश्यकारीहियावज्जीवंनशोचति॥तद्गच्छस्वसुखंप्राप्यकिंकार्यंपापिभिस्तव॥८२॥श्रुत्वोवाचपुनर्विप्रोधर्मराजमुखादिति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=14.11.19 10:23
,TRANSFERRED=2019/11/14 at 10:31:45
,PAGES=29
,TYPE=STD
,NAME=S0002089
,Book Name=M-509-AASHAD MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection